GOVERNMENT OF INDIA

ARCHÆOLOGICAL SURVEY OF INDIA

CENTRAL
ARCHÆOLOGICAL
LIBRARY

ACCESSION NO 23613

CALL No. 091.4912/G.O.M.L.M.

D.G.A. 79



A DESCRIPTIVE CATALOGUE

3927

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

23613

BY

M. RANGACHARYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, AND CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

AND

S. KUPPUSWAMI SASTRI,

PRINCIPAL, SANSKRIT COLLEGE, TIRUVADI, AND FOR SOME TIME AG. PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, AND AG. CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

Prepared under the orders of the Government of Madras.

091.4912
G.O.M.L.M

VOL. XVII—STOTRAS.

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1914.

23613
23. 4. 56
No. 091.4912/G.O.M.L.M

CONTENTS.

CLASS IX—STŌTRAS.

1. NĀMASTŌTRAS AND NĀMĀVALIS.

Name of the work.	Numbers.
(a) Hanumat.	
Āñjanēyasahasranāmāvali	8781
Āñjanēyāṣṭōttaraśatanāmāvali	8782
Hanumadaṣṭōttaraśatanāmastōtra	8783
Hanumadaṣṭōttaraśatanāmāvali	8784
Hanumaddvādaśanāmastōtra	8785 to 8787
(b) Umāmahēśvara.	
Umāmahēśvarasahasranāmāvali	8788
(c) Gaṇapati.	
Gaṇapatidvādaśanāmastōtra	8789 to 8793
Gaṇapatisahasranāmastōtra	8794 & 8795
Gaṇapatisahasranāmāvali	8796 & 8797
Gaṇapatyaṣṭōttaraśatanāmāvali...	8798
Gaṇēśāṣṭōttaraśatanāmastōtra	8799 to 8802
Gaṇeśāṣṭōttaraśatanāmāvali	8803 to 8805
Gaṇēśvarāṣṭōttaraśatanāmāvali	8806
Gaṇēśvarāṣṭōttarasahasranāmāvali	8807
Vighnēśāṣṭōttaraśatanāmāvali	8808 & 8809
Vighnēśvaraṣōḍaśanāmastōtra	8810 & 8811
Vidyāgaṇēśāṣṭōttaraśatanāmastōtra	8812
Vināyakāṣṭōttaraśatanāmastōtra	8313
Vināyakāṣṭōttaraśatanāmāvali	8814 to 8820
(d) Garuḍa.	
Garuḍadvādaśanāmastōtra	8821 & 8822
(e) Gāyatrī.	
Gāyatrīsahasranāmastōtra	8823 to 8827
Gāyatryaṣṭōttaraśatanāmastōtra	8828 to 8832
Sāvitryaṣṭōttaraśatanāmastōtra	8833
(f) Jina.	
Ārhatanāmastōtra	8834
Jinasahasranāmastōtra	8835 to 8839
Jināṣṭōttaraśatanāmāvali	8840
Jainācāryanāmāni	8841 to 8843

Name of the work.	Numbers.
(g) Padmāvatī.	
Padmāvatīsahasranāmastōtra	8844
(h) Parabrahma.	
Nigamāgamatriśatīnāmāvali	8845
(i) Pārvatī.	
Ambāṣṭōttaraśatanāmastōtra	8846
Indrākṣyāṣṭōttaraśatanāmāvali	8847
Umāṣṭōttaraśatanāmastōtra	8848 to 8851
Umāṣṭōttaraśatanāmāvali	8852 to 8860
Dēvyaṣṭōttaraśatanāmastōtra	8861 & 8862
Dēvyaṣṭōttaraśatanāmāvali	8863 & 8864
(j) Yamunā.	
Yamunānāmastōtra	8865
(k) Lakṣmī.	
Jānakīsahasranāmastōtra	8866
Ramāṣṭōttaraśatanāmāvali	8868
Lakṣmīsahasranāmāvali	8869 to 8872
Lakṣmyaṣṭōttaraśatanāmastōtra	8873 to 8877
Lakṣmyaṣṭōttaraśatanāmāvali	8878 to 8882
Varalakṣmyaṣṭōttaraśatanāmāvali	8883
Sītāṣṭōttaraśatanāmāvali	8884
(l) Vallabhācārya.	
Vallabhācāryanāmāvali	8885
(m) Viṣṇu.	
Kṛṣṇacaturviṁśatistōtra	8886
Kṛṣṇadvādaśanāmastōtra	8887
Kṛṣṇasahasranāmastōtra	8888 & 8889
Kṛṣṇāṣṭōttaraśatanāmastōtra	8890 to 8908
Kṛṣṇāṣṭōttaraśatanāmāvali	8909 to 8921
Kēśavādināmastōtra	8922
Gōpālasahasranāmastōtra	8923
Gōpālāṣṭōttaraśatanāmastōtra	8924
Gōpālāṣṭōttaraśatanāmāvali	8925
Dattātrēyadvādaśanāmastōtra	8926
Dattātrēyapañcāśannāmastōtra	8927
Dattātrēyasahasranāmastōtra	8928 & 8929

(*m*) *Viṣṇu*—cont.

Name of the work.	Numbers.
Dattātrēyāṣṭōttaraśatanāmastōtra	8930 & 8931
Daśāvatāranāmāvali	8932
Nāmamauktikamālā	8933
Nārāyanāṣṭōttaraśatanāmastōtra	8934 to 8936
Nṛsiṁhadvādaśanāmastōtra	8937
Nṛsiṁhasahasranāmastōtra	8938 to 8944
Nṛsiṁhasahasranāmāvali	8945
Nṛsiṁhāṣṭōttaraśatanāmastōtra	8946 to 8952
Nṛsiṁhāṣṭōttaraśatanāmāvali	8953 to 8958
Bhagavannāmāvali	8959
Yadugirināràyaṇāṣṭōttaraśatanāmāvali	8960
Raṅganāthāṣṭōttaraśatanāmastōtra	8961
Raṅganāthāṣṭōttaraśatanāmāvali	8962
Rāmadvādaśanāmastōtra	8963
Rāmasahasranāmastōtra	8964 to 8968
Rāmasahasranāmāvali	8969 to 8971
Rāmāṣṭāviṁśatidivyanāmastōtra	8972
Rāmāṣṭōttaraśatanāmastōtra	8973 to 8985
Rāmāṣṭōttaraśatanāmāvali	8986 to 8996
Rāmasahasranāmastōtra	8997
Rāmakarmanāmāṣṭāviṁśatyuttararaśatastōtra	8998
Rāmanāmāṣṭōttaraśatastōtra	8999
Varadarājāṣṭōttaraśatanāmāvali	9000
Varāhāṣṭōttaraśatanāmastōtra	9001
Varāhāṣṭōttaraśatanāmāvali	9002
Vāmanāṣṭōttaraśatanāmastōtra	9003
Vāsudēvasahasranāmastōtra	9004 & 9005
Viṣṇudvādaśanāmāvali	9006
Viṣṇuśatanāmaśtōtra	9007
Viṣṇusahasranāmastōtra	9008 to 9037
Viṣṇusahasranāmāvali	9038 to 9057
Viṣṇusahasranāmanirukti	9058 to 9060, 9062 & 9063
Viṣṇusahasranāmaṭīkā (Telugu)...	9061
Viṣṇusahasranāmabhāṣya	9064 to 9075
Viṣṇusahasranāmastōtravyākhyā	9076
Vēṅkaṭēśadvādaśanāmastōtra	9077 & 9078
Vēṅkaṭēśasahasranāmastōtra	9079 & 9082
Vēṅkaṭēśaṣaṭapañcāśannāmastōtra	9083
Vēṅkaṭēśāṣṭōttaraśatanāmastōtra	9084 to 9086
Vēṅkaṭēśāṣṭōttaraśatanāmāvali	9087 to 9090
Kṛṣṇasahasranāmastōtra	9091
Hayagrīvasahasranāmastōtra	9092
Hayagrīvāṣṭōttaraśatanāmastōtra	9093 to 9095

(*m*) *Viṣṇu*—cont.

Name of the work.	Numbers.
Hayagrīvāṣṭōttaraśatanāmāvali	9096
Aprameyāṣṭōttaraśatanāmastōtra	9097
Kṛṣṇāṣṭōttaraśatanāmastōtra	9098
Nṛsimhasahasranāmastōtra	9099
Nṛsimhāṣṭōttaraśatanāmastōtra	9100
Raṅganāthāṣṭōttaraśatanāmastōtra	9101

(n) *Kārtavīryārjuna.*

Kārtaviryāṣṭōttaraśatanāmastōtra	9102

(o) *Gaṅgā.*

Gaṅgāsahasranāmastōtra	9103

(p) *Tulasī.*

Tulasyaṣṭōttaraśatānāmāvali	9104

(q) *Viṭṭhalācārya.*

Viṭṭhalāṣṭōttaraśatanāmastōtra	9105

(r) *Vēdāntadēśika.*

Vēdāntadēśikasahasranāmastōtra	9106

(s) *Vikhanas.*

Vikhanassaptadaśanāmāni	9107

(t) *Śakti.*

Annapūrṇāṣṭōttaraśatanāmastōtra	9108
Annapūrṇāṣṭōttaraśatanāmāvali	9109 & 9110
Kālikāsahasranāmastōtra	9111
Kālikāsahasranāmāvali	9112
Kālīsahasranāmāvali	9113
Dēvitriśatīnāmastōtra	9114 to 9123
Dēvītriśatīnāmārthaprākāśikā	9124 & 9125
Dēvītriśatīnāmāvali	9126 to 9131
Dēvyaṣṭōttaraśatanāmastōtra	9132 to 9135
Dēvyaṣṭōttaraśatanāmāvali	9136 & 9137
Parāṣṭōttaraśatanāmastōtra	9138 & 9139
Parāsahasranāmastōtra	9140 & 9141
Pārvatyaṣṭōttaraśatanāmastōtra	9142
Pītāmbarīsahasranāmastōtra	9143 & 9144
Pītāmbaryaṣṭōttaraśatanāmastōtra	9145
Bālātripurasundarīsahasranāmastōtra	9146 to 9150
Bālātripurasundarīsahasranāmāvali	9151 to 9155
Bālātripurasundaryaṣṭōttaraśatanāmastōtra	9156 to 9159
Bālātripurasundaryaṣṭōttaraśatanāmāvali	9160 to 9162

(t) *Śakti*—cont.

Name of the work.	Numbers.
Brahmāstrabagalāmukhīpītāmbarīsahasranāmastōtra	9163
Bhuvanēśvaryaṣṭōttaraśatanāmastōtra	9164 to 9172
Ratyādiśaktināmāni	9173
Rājarājēśvarīvarṇamālikāṣṭōttaraśatanāmastōtra	9174
Lalitāpañcaviṁśatināmastōtra	9175
Lalitāṣṭōttaraśatanāmastōtra	9176 to 9178
Lalitāṣṭōttaraśatanāmāvali	9179 to 9182
Lalitāsahasranāmastōtra	9183 to 9195
Lalitāsahasranāmastōtrabhāṣya : Saubhāgyabhāskara	9196
Lalitāsahasranāmastōtrabhāṣya	9197
Lalitāsahasranāmāvali	9198 to 9205
Lalitāsahasranāmōttarapīṭhikā with commentary	9206
Vārāhyaṣṭōttaraśatanāmastōtra	9207 & 9208
Śyāmalāṣṭōttaraśatanāmastōtra	9209 & 9210
Śyāmalāsahasranāmasārastōtra	9211 & 9212

(u) *Śani.*

Śanyēkaviṁśatināmastōtra	9213

(v) *Śiva.*

Āgamatriśatināmāvali	9214
Gaurīśaṅkarāṣṭōttaraśatanāmāvali	9215
Cidambarāṣṭōttaraśatanāmāvali	9216
Jaṅgamāṣṭōttaraśatanāmastōtra	9217
Jaṅgamāṣṭōttaraśatanāmāvali	9218
Dakṣiṇāmūrtisahasranāmastōtra	9219 & 9220
Dakṣiṇāmūrtisahasranāmāvali	9221 & 9222
Dakṣiṇāmūrtyaṣṭōttaraśatanāmastōtra	9223 & 9224
Pañcākṣarāṣṭōttaraśatanāmastōtra	9225 & 9226
Pañcākṣarāṣṭōttaraśatanāmāvali	9227
Praṇavāṣṭāviṁśatināmāvali	9228
Praṇavāṣṭāviṁśatyuttaraśatanāmāvali	9229
Basavēśvarāṣṭōttaraśatanāmastōtra	9230 & 9231
Basavēśvarāṣṭōttaraśatanāmāvali	9232 & 9233
Bhairavāṣṭōttaraśatanāmastōtra	9234
Mahādēvāṣṭōttaraśatanāmastōtra	9235
Mahādēvāṣṭōttaraśatanāmāvali	9236
Mahēśvarāṣṭōttaraśatanāmāvali	9237
Rudratriśatināmāvali	9238
Rudrasahasranāmastōtra	9239 & 9240
Rudrāṣṭōttaraśatanāmāvali	9241
Vīrabhadrasahasranāmastōtra	9242 & 9243
Vīrēśāṣṭōttaraśatanāmastōtra	9244
Vīrēśvarāṣṭōttaraśatanāmastōtra	9245 & 9246

(*v*) *Śiva*—cont.

Name of the work.	Numbers.
Vīrēśāṣṭōttaraśatanāmāvali	9247
Vēdasāraśivasahasranāmastōtra	9248 to 9251
Śivagītāsahasranāmastōtra	9252 to 9255
Śivagītāsahasranāmāvali	9256 to 9258
Śivadvādaśanāmastōtra	9259 to 9261
Śivanāmamālā	9262
Śivanāmāvali	9263 to 9265
Śivaliṅgāṣṭōttaraśatanāmāvali	9266
Sivasahasranāmabhāṣya	9267
Śivasahasranāmamūlanyāsa	9268
Śivasahasranāmayugmanāmāni	9269
Śivasahasranāmastōtra	9270 to 9281
Śivasahasranāmāvali	9282 to 9297
Śivāṣṭōttaraśatanāmastōtra	9298 to 9313
Śivāṣṭōttaraśatanāmāvali	9314 to 9327
(*w*) *Sarasvatī.*	
Sarasvatīdvādaśanāmastōtra	9328
Sarasvatīsahasranāmastōtra	9329
Sarasvatyaṣṭōttaraśatanāmāvali	9330 to 9332
(*x*) *Sītarāma.*	
Sītārāmāṣṭōttaraśatanāmāvali	9333
(*y*) *Subrahmaṇya.*	
Subrahmaṇyasahasranāmastōtra	9334
Subrahmaṇyasahasranāmāvali	9335
Subrahmaṇyāṣṭōttaraśatanāmastōtra	9336
Subrahmaṇyāṣṭōttaraśatanāmāvali	9337 to 9341
(*z*) *Sūrya.*	
Sūryadvādaśanāmastōtra	9342
Sūryasahasranāmastōtra	9343 to 9346
Sūryāṣṭāviṁśatyuttaraśatanāmāvali	9347
Sūryāṣṭōttaraśatanāmastōtra	9348
Sūryāṣṭōttaraśatanāmāvali	9349 to 9354
Sūryaikaviṁśatināmastōtra	9355
(*aa*) *Harihara.*	
Hariharāṣṭōttaraśatanāmastōtra	9356
Hariharāṣṭōttaraśatanāmāvali	9357

A DESCRIPTIVE CATALOGUE
OF THE
SANSKRIT MANUSCRIPTS.
VOLUME XVII.

CLASS IX—STŌTRAS.

Stōtras are generally eulogistic poems addressed to one's deity or Guru. They are mostly in poetry, while a few of them are in prose. They ordinarily set forth the nature and characteristics of the God-head or His deeds in the various incarnations and often contain prayers to the deity. Most of the Stōtras are by known authors, while a few of them are extracted from the Purāṇas or Itihāsas. Nāmastōtras and Nāmāvalis are two of the main kinds of Stōtras. The former consists of descriptive epithets strung together in the form of verses. The latter consists of a collection of separate epithets in the dative case, each epithet being followed by the word नमः (salutation). These are repeated during the worship of a deity while performing the flower-offering. The number of epithets in both these classes is generally 1,008, 1,000 or 108. The Stōtras proper are sometimes prefaced like Mantras with an enumeration of the Ṛṣi (author), Chandas (metre), Dēvatā (deity), etc., and wound up with (Phalaśruti) an enumeration of the benefits accruing therefrom. Some of the Stōtras consist of a number of Sargas and are in the form of Kāvyas. They often embody high philosophic thoughts and lofty sentiments.

1. NĀMASTŌTRAS AND NĀMĀVALIS.

(*a*) HANUMAT.

No. **8781.** आञ्जनेयसहस्रनामावलिः.

ĀÑJANĒYASAHASRANĀMĀVALIḤ.

Pages, 30. Lines, 16 on a page.

Begins on fol. 47*a* of the MS. described under No. 3846.

Incomplete.

This work contains the praise of Āñjanēya or Hanumat by means of 1,008 attributes descriptive of his virtues and acts.

Beginning:

अनन्ताय नमः.	अनिलपुत्राय नमः.
अमृत्यवे नमः.	अग्निवदनाय नमः.
अव्यक्तस्वरूपाय नमः.	असह्यविक्रमाय नमः.
अनन्तरूपभृते नमः.	अपारान्ताय नमः.
अक्रूराय नमः.	अपाराङ्गाय नमः.

End:

हरिस्तुताय नमः.	हरिराजप्रियंकराय नमः.
हल(लि)विस्मयहारिणे नमः.	

No. 8782. आञ्जनेयाष्टोत्तरशतनामावलिः.

ĀÑJANĒYĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, paper. Size, $7\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 3. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 13*a*. The other work herein is Lalitāsahasranāmāvali 1*a*.

Complete.

Similar to the above; but this contain a collection of 108 attributes

Beginning:

अभूतपूर्वजाय नमः । अग्नये नमः । अञ्जनागर्भसम्भवाय नमः । नभस्वद्वरपुत्राय नमः । दीप्तकालाग्निसन्निभाय नमः ।

End:

वीराय नमः । शीघ्राभीष्टफलप्रदाय नमः । श्रीरामचन्द्रकरुणा-सान्द्रवीक्षणतत्पराय नमः ॥

Colophon:

आञ्जनेयाष्टोत्तरं सम्पूर्णम् ॥

No. 8783. हनुमदष्टोत्तरशतनामस्तोत्रम्.

HANUMADAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 10 on a page.

Begins on fol. 12*a* of the MS. described under No. 6090.

Complete.

Similar to the above, but the work is metrical. It is stated that the reading of this eulogy has the power to enable one to accomplish one's objects and to liberate one from bondage.

Beginning:

अञ्जनी(ना)गर्भसंभूतो वायुपुत्रो महाबलः ।
चिरञ्जीवी ब्रह्मचारी कर्णकुण्डलसेवितः ॥
वनवासी पिङ्गकेशी रामदूतोऽसुरान्तकः ।
सुग्रीवकार्यकर्ता च वालिविग्रहणस्तथा ॥

End:

प्रवणः पापसंहारी दुर्लभो दुरितान्तकः ।
महायोगी महोदारस्सदा श्रीरामसंनिधिः ॥
य इदं पठते नित्यं नाम्नामष्टोत्तरं शतम् ।
सर्वपापविनिर्मुक्तं सर्वोपद्रवनाशनम् ॥

* * * *

वारमष्टोत्तरशतं त्रिपक्षं कार्यसाधकम् ॥
बन्धनान्मुक्तिमाप्नोति सर्वशत्रुविनाशनम् ।
अष्टसौभाग्यसंप्राप्ते(प्त्यै) सर्वकामार्थसिद्धये ॥

Colophon:

इति हनुमदष्टोत्तरशतं संपूर्णम् ॥

No. 8784. हनुमदष्टोत्तरशतनामावलिः.

HANUMADAṢṬOTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 30*b* of the MS. described under No. 8632.

Complete.

Similar to the last but one.

Beginning:

हनुमते नमः, वानरश्रेष्ठाय नमः, सुरप्रियाय नमः, सद्गुणाय नमः, सकलाराध्याय नमः, सर्वगीर्वाणसेविताय नमः, भक्तप्रियाय नमः, भक्तिदाय नमः, भक्तवात्सल्यतत्पराय नमः, पञ्चेन्द्रियजयिने नमः, वर्णिनेनमः, ओङ्कारगृहसंस्थिताय नमः, वेदवेदान्तवेद्याय नमः, सीतानायकपूजिताय नमः ।

End:

स्मृतकार्यसिद्धिकृते नमः, सुन्दराङ्गाय नमः, सुवृत्ताय नमः, सूर्याभ्यस्तविशारदाय नमः, नीतभयाय नमः, रामैकभक्ताय नमः, श्रीमदाञ्जनेयाय नमः, श्रीमहादेवांशसंभवाय नमः, पीतवाससे नमः, प्रियंवदाय नमः, प्रियकृते नमः, प्रीतिदाय नमः, श्रीमद्धनुमते नमः ॥

Colophon:

हनुमदष्टोत्तरशतनाम संपूर्णम् ॥

No. 8785. हनुमद्द्वादशनामस्तोत्रम्.

HANUMADDVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 183*a* of the MS. described under No. 5661, but is mentioned therein as Hanumatstōtra.

Complete.

This gives twelve descriptive names of Hanumat in the Anuṣṭup metre.

Beginning:

हनूमानञ्जनासूनुर्वायुपुत्रो महाबलः ।
रामेष्टः फल्गुनसखः पिङ्गाक्षोऽमितविक्रमः ॥

End:

लक्ष्मणप्राणदाता च दशग्रीवस्य दर्पहा ॥
द्वादशैतानि नामानि कपीन्द्रस्य महात्मनः ॥
* * * *
भयानि तस्य नश्यन्ति सर्वत्र विजयं भवेत् ॥

Colophon:

हनुमत्(द्वादशनाम)स्तोत्रं संपूर्णम् ॥

No. 8786. हनुमद्द्वादशनामस्तोत्रम्.

HANUMADDVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 4 on a page.

Begins on fol. 127*a* of the MS. described under No. 29.

Complete.

Same as the above, but the following is additional :—

मर्कटेश महोत्साह सर्वशोकविनाशन ।
शत्रुसंहार मां रक्ष श्रियं दापय मे हरे ॥
समस्तदुस्तरव्याधीनिवारणपटीयसे ।
अच्युतानन्तगोविन्दनाम्ने ना(धा)म्ने नमो नमः ॥

No. 8787. हनुमद्द्वादशनामस्तोत्रम्.

HANUMADDVĀDAŚANĀMASTŌTRAM.

Substance, palm-leaf. Size, 15⅞ × 1¼ inches Pages 4. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 48*a* and 49*a* (Two copies.) The other works herein are Śrutigītā (with Tamil commentary) 1*a*, Sōmōtpatti 34*a*, Caraṇavyūha 37*a* and 43*a*.

Complete.

Same as the above.

This is intended to be religiously repeated for curing certain disorders in the body of a woman.

(*b*) UMĀMAHĒŚVARA.

No. 8788. उमामहेश्वरसहस्रनामावलिः.

UMĀMAHĒŚVARASAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, 15½ × 1⅛ inches. Pages, 37. Lines, 7 on a page. Character, Telugu and Grantha. Condition, good. Appearance, old.

Begins on fol. 9*a*. The other works herein are Śivāṣṭōttaraśatanāmastōtra 1*a*, Dēvyaṣṭōttaraśātanāmastōtra 1*b*, Gāyatryaṣṭōt.

taraśatanāmastōtra 2*a*, Rāmāṣṭōttaraśatanāmastōtra 3*a*, Kṛṣṇāṣṭōttaraśatanāmastōtra 3*b*, Tripurasundaryaṣṭōttaraśatanāmastōtra 4*a*, Tripurasundaryaṣṭōttaraśatanāmāvali 5*a*.

Complete. Forms the 40th Adhyāya of Bhaviṣyōttarapurāṇa

This work, which contains a collection of 1,008 epithets of Śiva and of Pārvati, is prefaced with a number of stanzas giving the Ṛṣi, Chandas, Dēvatā, etc., and wound up with a number of other stanzas which enumerate the advantages arising from the reading of this work.

Beginning :

कैलासशिखरे रम्ये नानामुनिनिषेविते ।
कल्प[हा]कानोकहाक्रान्ते कैवल्यपददायिने ॥

* * * *

प्रणम्य दण्डवद्भूमौ झटित्युत्थाय संभ्रमात् ।
हर्षगद्गदया वाचा उवाच वचनं विधिः ॥

पुराकल्पे महातेजाः हयग्रीवो महामुनिः ।
सर्वलोकोपकाराय प्रोक्तवान् कुम्भजन्मने ॥

* * * *

अस्य नामसहस्रस्य ऋषिर्भृङ्गिरिटः परः ।
छन्दो विराट् देवते च कामकामेश्वराभिधौ ॥

तारं मायां बीजशक्ती विनियोगः कराङ्गयोः ।
षडङ्गदेवताभिश्च न्यासं कृत्वा चतुर्मुख ॥

ध्यात्वा च मामकं रूपं गिरिजारूपमद्भुतम् ।
कृत्वा पञ्चोपचारं च जप्त्वा पञ्चदशाक्षरीम् ॥

ततस्स्वनामभिर्दिव्यैस्सहस्रैर्वर्णसंहितैः ॥
मल्लिकामालतीजातिपुन्नागैस्तुलसीदलैः

* * * *

श्रीशिव उवाच—

अखण्डमण्डलाकाराय नमः । अखिलाण्डैकनायिकायै नमः ॥
अमरेन्द्रार्चितपदाय नमः । अमरारिनिषूदिन्यै नमः ॥
अनादिनिधनाय नमः । अनन्तकोटिसूर्यसमप्रभायै नमः ॥
अनन्ताय नमः । अनन्तभूतेश्यै नयः ॥

End:

श्रीमेश्वरकामेश्वर्यै नमः । परापरदेवतायै नमः ॥

Colophon:

सहस्रनामार्चनं संपूर्णम् ॥

इत्येतत् कथितं ब्रह्मन् नाम्नां साहस्रमुत्तमम् ।
अकारादिक्षकारन्तमातृकावर्णगुम्भितम् ॥
उभयात्मकसाहस्रनामस्तोत्रं विशेषतः ।
ये पठन्ति सकृद्भक्त्या तत् पदं यान्त्यसंशयः ॥

* * * *

देवाश्च मुनयस्सर्वे मनुजाश्च द्विजादयः ।
पठित्वा सकलान् कामान् लभन्ते शाश्वतं फलम् ॥

Colophon:

इति भविष्योत्तरपुराणे शिवविरिञ्चसंवादे उभयात्मकसहस्रनामस्तोत्रं नाम चतुश्चत्वारिंशोऽध्यायः ॥

(c) GAṆAPATI.

No. 8789. गणपतिद्वादशनामस्तोत्रम्.

GAṆAPATIDVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 126*a* of the MS. described under No. 29.

Complete.

A eulogistic peom giving twelve epithets of Gaṇapati. A formal reading of this work is stated to enable one to accomplish one's objects without hindrance.

Beginning:

प्रणम्य शिरसा देवं गौरीपुत्रं विनायकम् ।
भक्तचानुसंस्मरेन्नित्यमायुःकामार्थसिद्धये ॥
प्रथमं वक्रतुण्डश्च एकदंष्ट्रं द्वितीयकम् ।
तृतीयं रक्तपिङ्गाक्षं चतुर्थं गजकर्णकम् ॥

End:

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः ।
न च विघ्नो भवेत्तस्य सर्वकामार्थसिद्धये ॥
विद्यार्थी लभते विद्यां धनार्थी लभते धनम् ।
कन्यार्थी लभते कन्यां मोक्षार्थी लभते गतिम् ॥
इति ग(गा)णपतिं(तं)स्तोत्रं षण्मासैश्च फलं लभेत् ।
संवत्सरेण सिध्यन्ति लभते वाञ्छितं फलम् ॥

Colophon:

इति गणपतिस्तवराजस्सम्पूर्णः ॥

No. **8790.** गणपतिद्वादशनामस्तोत्रम्.

GAṆAPATIDVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 8 on a page.

Begins on fol. 192*a* of the MS. described under No. 119, and not on fol. 190*a* as shown therein.

Complete.

Similar to the above.

Beginning:

शुक्लाम्बरधरं . . . . शान्तये ॥
विघ्नध्वान्तनिवारणैकतरणिर्विघ्नाटवीहव्यवाट्
विघ्नव्यालकुलेऽपि मत्तगरुडो विघ्नेभपञ्चाननः ।
विघ्नोत्तुङ्गगिरिप्रभेदनपटुर्विघ्नाब्धिकुम्भोद्भवो
विघ्नाघौघप्रचण्डचण्डपवनो विघ्नेश्वरः पातु माम् ॥

* * * *

प्रथमं वक्रतुण्डन्तु एकदन्तं द्वितीयकम् ॥

End:

एकादशं गणपतिं द्वादशं हस्तिसम्मुखम् ।
एतानि द्वादश नामानि त्रिसन्ध्यं यः पठेन्नरः ॥

* * * *

जपेद्गणपतिस्तोत्रं षण्मासात्सिद्धिरुच्यते ॥

No. **8791.** गणपतिद्वादशनामस्तोत्रम्.

GAṆAPATIDVĀDAŚANĀMASTŌTRAM.

Substance, palm-leaf. Size, 11 × 1¼ inches. Pages, 2. Lines, 4 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vināyakāṣṭōttaraśatanāmāvali 2*a*, Gaṅgādharapadārthavicāra 8*a*, Ratirahasya (with Kanarese commentary) 16*a*, Pārthivaliṅgapūjāvidhi 26*a*, Śrīsūkta 37*a*, Pavamānasūkta 40*a*, Navagrahaśānti 44*b*, Jayādihōma 51*a*.

Complete.

Same as the above. The Ṛṣi, Chandas, Dēvatā, etc., are given.

Beginning:

अस्य श्रीविघ्नेश्वरद्वादशनामस्तोत्रमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः, अनुष्टुप् छन्दः, श्रीविघ्नेश्वरो देवता, श्रीविघ्नेश्वरप्रीत्यर्थे समस्तपापक्षयार्थे इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः । . . . . . .

प्रथमं वक्रतुण्डश्च द्वितीयश्चैकदंष्ट्रकम् ।

End:

ज्ञानार्थी लभते ज्ञानं मोक्षार्थी लभते गतिम् ॥

Colophon:

इति ब्रह्मविष्णुमहेश्वरप्रोक्तं विघ्नेश्वरद्वादशनामस्तोत्रं सम्पूर्णम् ॥

No. **8792.** गणपतिद्वादशनामस्तोत्रम्.

GAṆAPATIDVĀDAŚANĀMASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 147*a* of the MS. described under No. 5661, wherein this is mentioned as Vighnēśvarastōtra.

Complete.

Similar to the above.

Beginning:

अस्य श्रीभारद्वाजनामस्तोत्रमन्त्रस्य आश्वलायन ऋषिः, अनुष्टुप् छन्दः, मम वाक्सिद्ध्यर्थे जपे विनियोगः । अगस्त्य उवाच--

प्रणम्य शिरसा देवं वन्दे विघ्नविनायकम् ।
भक्त्याधिकं स्मरेन्नित्यमायुष्कामार्थसिद्धये ॥
प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयकम् ।

End:

जपेद्गणपतिस्तोत्रं षण्मासैर्लभते फलम् ॥
संवत्सरेण सिध्यन्ति लभन्ते नात्र संशयः ।
ब्राह्मणान्भ्रासयित्वा तु विद्यामेति गजाननात् ॥

No. **8793.** गणपतिद्वादशनामस्तोत्रम्.

GAṆAPATIDVĀDAŚANĀMASTŌTRAM

Pages, 2. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 5533, and is mentioned therein as Vināyakastōtra

Complete.

Similar to the above.

Beginning:

अस्य श्रीविनायकस्तोत्रमन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीविनायको देवता, मम इष्टकाम्यार्थसिद्ध्यर्थे विनियोगः । ध्यानम्—

प्रणम्य शिरसा देवं गजवक्त्रं विनायकम् ।
भक्तद्यादिसंस्तुतन्नित्यमायुष्कामार्थसिद्धये ॥

यानि द्वादश नामानि प्रवक्ष्यामि यथाक्रमम् ।
प्रथमं वक्रतुण्डश्च एकदंष्ट्रं द्वितीयकम् ॥

End:

एकादशं गणपतिं द्वादशं हस्तिमस्तकम् ।
एतानि द्वा . . . . . नरः ।
अष्टौ ब्राह्मणान् ग्राहयित्वा . . . विद्यार्थसिद्धये ॥

Colophon:

इति विनायकस्तोत्रं सम्पूर्णम् ॥

No. 8794. गणपतिसहस्रनामस्तोत्रम्.

GAṆAPATISAHASRANĀMASTŌTRAM.

Pages, 24. Lines, 7 on a page.

Begins on fol. 84*a* of the MS. described under No. 5417, wherein this has been mentioned as Vināyakasahasranāma.

Complete. From Āgnēyapurāṇa.

Contains 1,008 eulogistic names of Gaṇapati in the metrical form, with Pūrvapīṭhikā and Phalaśruti.

Beginning:

देवः पूर्वं पुरारातिः पुरत्रयजयोद्यमे ।
अनर्च्चनाद्गणेशस्य जातो विघ्नाकुलः किल ॥
मनसा स विनिर्धार्य ततस्तद्विघ्नगोचरम् ।
महागणपतिं भक्त्या समभ्यर्च्च्य यथाविधि ॥

* * * *

सर्वविघ्नप्रशमनं सर्वकामफलप्रदम् ।
ततस्तस्मै स्वस्य नाम्नां सहस्रमिदमब्रवीत् ॥

अस्य श्रीमहागणपतिसहस्रनामस्तोत्रमन्त्रस्य गणेश ऋषिः, नानाविधानि छन्दांसि, महागणपतिर्देवता, जं इति बीजं, तुङ्ग इति शक्तिः, स्वाहेति कीलकम्, आत्मनश्चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ।

श्रीगणपतिरुवाच—

गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ।
एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो महोदरः ॥

End:

इति वैनायकं नाम्नां सहस्रमिदमीरितम् ।
इदं ब्राह्मे मुहूर्ते यः पठति प्रत्यहं नरः ॥
करस्थं तस्य सकलमैहिकामुष्मिकं सुखम् ।

* * * *

नमो नमस्सुरवरपूजिताङ्घ्रये
नमो नमो निरुपममङ्गलात्मने ।
नमो नमो विपुलपदैकसिद्धये
नमो नमः करिकलभाननाय ते ॥

Colophon:

इत्याग्नेयपुराणे विनायकसहस्रनाम सम्पूर्णम् ॥

No. 8795. गणपतिसहस्रनामस्तोत्रम्.

GAṆAPATISAHASRANĀMASTŌTRAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 16. Lines, 6 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 8*a*. The other works herein are Nṛsiṁhasahasranāmāvali 1*a*, Gaṇapatisahasranāmāvali 16*a*.

Complete. From Pādmapurāṇa.

Same as the above.

Colophon:

इति श्रीपद्मपुराणे महागणपतिसहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. 8796. गणपतिसहस्रनामावलिः.

GAṆAPATISAHASRANĀMĀVALIḤ.

Pages, 32. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under the previous number.

Complete.

Similar to the above. The names are given separately and are not strung together in a metrical form.

Beginning:

अस्य श्रीमहागणपतिस्तोत्रमन्त्रस्य गणक ऋषिः, महागणपतिर्देवता, अनुष्टुप् छन्दः, मम सा(स्वा)भीष्टसिद्ध्यर्थे जपे विनियोगः ।

महागणपतिरुवाच—

गणेश्वराय नमः । गणक्रीडाय नमः । गणनाथाय नमः । गणाधिपाय नमः । एकदंष्ट्राय नमः । वक्रतुण्डाय नमः । गजवक्त्राय नमः । महोदराय नमः ॥

End:

अनन्तदेवतासेव्याय नमः । अनन्तफलदायकाय नमः । अनन्तानन्तसौख्यदायकाय नमः ।

Colophon:

इति वैनायकं नाम ॥

No. 8797. गणपतिसहस्रनामावलिः.

GAṆAPATISAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{3}{4}$ inches. Pages, 10. Lines, 11 on a page. Character, Grantha Condition, good. Appearance, new.

Begins on fol. 9*a*. The other work herein is Vaidyāviṣaya (Telugu) 1*a*.

Wants beginning. Incomplete.

Similar to the above.

Beginning:

अनामयाय नमः । अमलाय नमः । अमोघसिद्धये नमः । अद्वैताय नमः । मनःप्रीतिमानसाय नमः । अनेकाभिरूपाय नमः ।

End:

अनन्तनाम्ने नमः । अनन्तश्रियै नमः । अनन्तानन्तसौख्यदाय नमः । वल्लभापते श्रीमहागणपतये नमः ॥

Colophon:

सहस्रनाम सम्पूर्णम् ॥

No. 8798. गणपत्यष्टोत्तरशतनामावलिः.
GAṆAPATYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 11 on a page.

Begins on fol. 21*b* of the MS. described under No. 2467.

Complete.

Similar to the above. There are only 108 epithets here given.

Beginning:

ओं गणपतये नमः । गौरीसुताय नमः । गजमुखाय नमः । अजराय नमः । क्लींकारिणे नमः । विनायकाय नमः ॥

End:

शक्तिनाथाय नमः । करुणानिधये नमः । विश्वपतये नमः । वल्लभापते श्रीमन्महागणपतये नमः ॥

No. 8799. गणेशाष्टोत्तरशतनामस्तोत्रम्.
GAṆĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 16*b* of the MS. described under No. 6045, wherein this has been mentioned as Gaṇapatyaṣṭōttaraśatanāmastōtra.

Almost complete. From Āgnēyapurāṇa.

Similar to the above.

Beginning:

अस्य श्रीमहागणपत्यष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीमहागणपतिर्देवता, गं बीजं, स्वाहा शक्तिः, ओमिति कीलकं, श्रीमहागणपतिप्रीत्यर्थे जपे विनियोगः ।

ध्यानम्—

गजवदनमचिन्त्यं तीक्ष्णदंष्ट्रं त्रिनेत्रं
बृहदुदरमनीशं विघ्नराजं नमामि ।
गणेशश्चाम्बिकासूनुः विघ्नेशो द्विरदाननः ।
विनायको विश्वरूपः शाङ्करस्स्कन्दपूर्वजः ॥

See under the next number for the end.

No. 8800. गणेशाष्टोत्तरशतनामस्तोत्रम्.

GAṆĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 145*a* of the MS. described under No. 5661, wherein this has been mentioned as Gaṇapatyaṣṭōttaraśata.

Complete.

Same as the above.

See under the previous number for the beginning.

End:

यो बीजाक्षरपूतेन केन वा जप्यते स्तवः ।
तेषां भवति संसिद्धिः सत्यं सत्यं न संशयः ॥

Colophon:

इत्याग्नेयपुराणे गणपत्यष्टोत्तरशतदिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

No. 8801. गणेशाष्टोत्तरशतनामस्तोत्रम्.

GAṆĒŚĀṢṬŌTTARASATANĀMASTŌTRAM.

Pages, 3. Lines, 19 on a page.

Begins on fol. 72*a* of the MS. described under No. 426, and is mentioned therein as Vighnēśvarāṣṭōttaraśatanāmastōtram.

Complete.

Similar to the above.

Beginning :

गणेशश्चाम्बिकासूनुर्विघ्नेशो द्विरदाननः ।
विनायको विघ्नरूपः शङ्करस्कन्दपूजितः ॥
लम्बोदरश्शूर्पकर्णो हेमाङ्गस्सर्पभूषणः ।
सर्पयज्ञोपवीती च विकटस्सर्पमेखलः ॥

End :

नक्षत्रमालाभरणः योगिहृत्पद्मशेवधिः ॥
इदं महागणपतेर्नाम्नामष्टोत्तरं शतम् ।
रहस्यं सर्वमन्त्राणां सर्वकार्यार्थसिद्धिदम् ॥

* * * *

तेषां भवति सिद्धिश्च सत्यं सत्यं न संशयः ॥

Colophon :

अष्टोत्तरं सम्पूर्णम् ॥

No. 8802. गणेशाष्टोत्तरशतनामस्तोत्रम्.

GAṆĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Substance, palm-leaf. Size, $5\frac{1}{3} \times 1$ inches. Pages, 9. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Beging on fol. 9*a*. The other works herein are Vighnēśvaraprārthanāpadyamu 1*a*, Vighnēśvaradaṇḍakamulu 2*a*, Vināyakapūjā 13*a*.

Complete.

Same as the above.

No. 8803. गणेशाष्टोत्तरशतनामावलिः.

GAṆĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 143*a* of the MS. described under No. 29.

Complete.

Similar to the above. The names are given here separately.

Beginning:

ओं गणेशाय नमः । अम्बिकासूनवे नमः। विघ्नेशाय नमः । द्विरदाननाय नमः । विनायकाय नमः । विश्वरूपाय नमः ॥

End:

सनातनाय नमः । नक्षत्रमालाभरणाय नमः । योगिहृत्पद्मसंस्थिताय नमः ॥

Colophon:

इति श्रीविघ्नेश्वरस्य नाम्नामष्टोत्तरं शतम् ॥

No. 8804. गणेशाष्टोत्तरशतनामावलिः.

GAṆĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 227*a* of the MS. described under No. 5661, wherein this has been mentioned as Vighnēśvarāṣṭōttaraśata.

Complete.

Similar to the above.

It is stated that this MS. was transcribed by Mājēti Sarvēśaliṅgam on Sunday, the 30th day of the month of Kārttika, during the dark fortnight in the year Bhava.

See under the previous number for the beginning.

End:

ओं परंज्योतिषे नमः । ओं सनातनाय नमः । ओं नक्षत्रमालाभरणाय नमः । ओं योगिहृत्पद्मसंस्थिताय नमः ॥

Colophon:

विघ्नेश्वराष्टोत्तरशतनामानि सम्पूर्णानि ॥

No. 8805. गणेशाष्टोत्तरशतनामावलिः.

GAṆĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 2*a* of the MS. described under No. 5789, wherein this has been mentioned as Vighnēśvarāṣṭōttaraśatanāmāvali.

Complete.

Similar to the above.

Beginning:

गणेशाय नमः । विघ्नराजाय नमः । गौरीपुत्राय नमः । विनायकाय नमः । स्कन्दाग्रजाय नमः । अव्ययाय नमः ।

End:

वरमूषिकवाहनाय नमः । सर्वात्मने नमः । सर्वकर्त्रे नमः । सर्वसिद्धिप्रदायकाय नमः ॥

Colophon:

इत्यष्टोत्तरशतं सम्पूर्णम् ॥

No. 8806. गणेश्वराष्टोत्तरशतनामावलिः.

GAṆĒŚVARĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, 13⅝ × 1¼ inches. Pages, 3. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 67*a*. The other works herein are Viṣṇusahasranāmastōtra 1*a* and 23*a*, Viṣṇusahasranāmapūrvōttarapīṭhikā 17*a*, Śivasahasranāmastōtra 31*b*, Viṣṇusahasranāmāvali 42*a*, Śivasahasranāmāvali 52*a*, Sarasvatyaṣṭōttaraśatanāmāvali 63*a*, Rāmāṣṭōttaraśatanāmāvali 64*a*, Narasiṁhāṣṭōttaraśatanāmāvali 65*a*, Viṣṇusahasranāmāvali 69*a*.

Complete.

Similar to the one described under the last number.

Beginning:

गणेश्वराय नमः। विघ्नराजाय नमः। गौरीपुत्राय नमः। स्कन्दाग्रजाय नमः। अव्ययाय नमः। पूताय नमः। दक्षाय नमः।

End:

हृष्टचित्ताय नमः। सर्वात्मने नमः। सर्वसिद्धिप्रदायकाय नमः। श्रीविघ्नेश्वराय नमः॥

No. 8807. गणेश्वराष्टोत्तरसहस्रनामावलिः.
GAṆĒŚVARAṢṬŌTTARĀSAHASRANĀMĀVALIḤ.

Pages, 6. Lines, 11 on a page.

Begins on fol. 23*a* of the MS. described under No. 2467, wherein this has been shown as Gaṇēśāṣṭōttarasahasranāmāvali 22*a*.

Incomplete.

Similar to the above; contains 1,008 names.

Beginning:

गणेश्वराय नमः। गणक्रीडाय नमः। गणनाथाय नमः। गणाधिपाय नमः। एकदंष्ट्राय नमः। वक्रतुण्डाय नमः। गजवक्त्राय नमः। महोदराय नमः॥

End:

अजयाय नमः। अजय्याय नमः। अनाधाराय नमः॥

No. 8808. विघ्नेशाष्टोत्तरशतनामावलिः.
VIGHNĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 11 on a page.

Begins on fol. 22*a*, of the MS. described under No. 2467, wherein this has been shown as Gaṇēśāṣṭōttaraśatanāmāvali.

Complete.

Similar to the above.

Beginning:

विघ्नेशाय नमः । लम्बोदराय नमः । हरसूनवे नमः । गजकर्णाय नमः । गुहाग्रजाय नमः ।

End:

अमोघसिद्धये नमः । आनन्दकाय नमः । अद्वैताय नमः । शुद्धिदाय नमः । श्रीमहागणपतये नमः ॥

Colophon:

अष्टोत्तरं सम्पूर्णम् ॥

No. **8809.** विघ्नेशाष्टोत्तरशतनामावलिः.

VIGHNĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 148*a* of the MS. described under No. 5661.

Complete.

Similar to the above.

Beginning:

विघ्नेशाय नमः । विश्ववन्द्याय नमः । विश्वचक्षुषे नमः । जगत्पतये नमः । हिरण्यरूपाय नमः । सर्वात्मने नमः । सुरूपाय नमः ।

End:

सतीपुत्राय नमः । विघ्नेश्वराय नमः । विघ्नविनायकाय नमः । मङ्गलमूर्तये नमः ॥

Colophon:

विघ्नेश्वराष्टोत्तरशतनाम सम्पूर्णम् ॥

No. **8810.** विघ्नेश्वरषोडशनामस्तोत्रम्.

VIGHNĒŚVARAṢŌḌAŚANĀMASTŌTRAM.

Pages, 2. Lines, 4 on a page.

Begins on fol. 164*a* of the MS. described under No. 29, wherein this has been mentioned as Śivaganapatistōtram.

Complete.

Gives the sixteen names usually attributed to Gaṇēśa.

Beginning:

नन्दीश्वर नमस्तुभ्यं सदानन्दप्रदायक ।
महादेवस्य सेवार्थमनुज्ञान्दातुमर्हसि ॥
नीलकण्ठपदाम्भोजपरिस्फुरितमानस ।
शम्भोस्सेवाफलन्देहि चण्डीश्वर नमोऽस्तु ते ॥
अतिक्रूर महाकाय कल्पान्तदहनोपम ।
भैरवाय नमस्तुभ्यमनुज्ञान्दातुमर्हसि ॥
उमाकोमलहस्ताब्जसम्भावितललाटकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।

End:

वक्रतुण्डः शूर्पकर्णो हेरम्बः स्कन्दपूर्वजः ॥
षोडशैतानि नामानि यः पठेच्छृणुयादपि ।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥
सङ्ग्रामे सर्वकार्येषु विघ्नस्तस्य न जायते ॥

No. 8811. विघ्नेश्वरषोडशनामस्तोत्रम्.
VIGHNĒŚVARAṢŌḌAŚANĀMASTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 147*a* of the MS. described under **No. 5661**, wherein this has been shown as Vighnēśvarastōtra.

Complete.

Same as the above but does not contain the prefatory stanzas.

Beginning:

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥

End:

षोडशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्गामे सर्वकार्येषु विघ्नस्तस्य न जायते ॥

No. 8812. विद्यागणेशाष्टोत्तरशतनामस्तोत्रम्.

VIDYĀGAṆĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 51*b* of the MS. described under No. 2886.

Complete. From the Śaiva-tantra of Ākāśabhairavakalpa.

Gaṇapati is addressed by these 108 names with a view to obtain proficiency in learning.

Beginning:

श्रीमद्विद्यागणेशस्य नाम्नामष्टोत्तरं शतम् ।
वक्ष्यामि शृणु देवेशि सावधानेन चेतसा ॥

* * * *

विद्यागणपतिर्विघ्नहरो गजमुखोऽव्ययः ।
विज्ञानात्मा वियत्कायो विश्वाकारो विनायकः ॥

End:

इति विद्यागणपतेर्नाम्नामष्टोत्तरं शतम् ।
यः पठेच्छृणुयाद्वापि सत्यं भक्तिसमन्वितः ॥
तस्य साधकवर्यस्य सर्वावस्थासु सर्वदा ।
न साध्यमस्ति किमपि विद्याविघ्नेश्वरात्मज ॥

Colophon:

इति महाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे शङ्करविरचिते गणेशाष्टोत्तरशतस्तोत्रं सम्पूर्णम् ॥

No. 8813. विनायकाष्टोत्तरशतनामस्तोत्रम्.

VINĀYAKĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 75*a* of the MS. described under No. 1500, wherein this has been mentioned as Vināyakāṣṭōttaraśatanāmāvali.

Complete.
Similar to the above.

Beginning:

गजाननो गणाध्यक्षो विघ्नराजो विनायकः ।
द्वैमातुरश्च द्विमुखो महाकायो महाबलः ॥
सुरारिघ्नस्सुराध्यक्षो ह्रस्वग्रीवो महोदरः ।
हेरम्बो लम्बजठरो महावीरो मदोत्कटः ॥

End:

विघातवादी विकटो गणेशोऽआ(प्या)खुवाहनः ।
लम्बोदरस्स्थूलकण्ठः सोमसूर्याग्निलोचनः ॥
भुजङ्गभूषणश्चैव सर्वसिद्धिप्रदायकः ।
एवमष्टोत्तरशतं चतुर्वर्गफलप्रदम् ॥
यः पठेच्छ्रद्धया धीरः शिवलोकमवाप्नुयात् ॥

No. 8814. विनायकाष्टोत्तरशतनामावलिः.

VINĀYAKĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 7 on a page.
Begins on fol. 83*a* of the MS. described under No. 1500.
Complete.
Similar to the one described under No. 8803.

Beginning:

गजाननाय नमः । गणाध्यक्षाय नमः । विघ्नराजाय नमः । विनायकाय नमः । द्वैमातुराय नमः ।

End:

सर्वसिद्धिप्रदायकाय नमः ॥
एवमष्टोत्तरशतं चतुर्वर्गफलप्रदम् ।
यः पठेच्छ्रद्धया वीरश्शिवलोकमवाप्नुयात् ॥

No. **8815.** विनायकाष्टोत्तरशतनामावलिः.

VINĀYAKĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 19*b* of the MS. described under No. 8632.

Complete.

Similar to the above.

Beginning:

विनायकाय नमः । विघ्नराजाय नमः । जगन्नाथाय नमः । महाधीराय नमः । महाकायाय नमः । स्निग्धाङ्गाय नमः ।

End:

कापित्थफलप्रियाय नमः । शोकविनाशनाय नमः । सिद्धिविनायकाय नमः । सर्वज्ञाय नमः ॥

Colophon:

एवं विनायकाष्टोत्तरशतं सम्पूर्णम् ॥

No. **8816.** विनायकाष्टोत्तरशतनामावलिः.

VINĀYAKĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 49*a* of the MS. described under No. 5537, wherein this has been shown as Vighnēśvarāṣṭōttaraśatanāmāvali.

Complete.

Similar to the above.

Beginning:

विनायकाय नमः । विघ्नराजाय नमः । गणनाथाय नमः । गजाननाय नमः । महोदराय नमः । महाकायाय नमः । स्निग्धाङ्गाय नमः । देवाय नमः ।

End:

शुद्धाय नमः । आद्याय नमः । कपिलाय नमः । श्रीमहागणपतये नमः ॥

Colophon:

महागणपत्यष्टोत्तरशतनाम सम्पूर्णम् ॥

No. 8817. विनायकाष्टोत्तरशतनामावलिः.

VINĀYAKĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 21 on a page.

Begins on fol. 61*a* of the MS. described under No. 426, wherein this has been shown as Gāṇēśāṣṭōttaraśatanāmāvali.

Complete.

Similar to the above.

Beginning:

विनायकाय नमः । शिवसुताय नमः । गणेशाय नमः । विघ्नेश्वराय नमः । गजाननाय नमः । हेरम्बाय नमः ।

End:

सर्वलोकप्रियाय नमः । दिव्यनेत्राय नमः । गङ्गापुत्राय नमः । श्रीमहागणाधिपतये नमः । श्रीमहाधिपतये नमः ॥

Colophon:

इति गणेशाष्टोत्तरशतनामावलिः समाप्ता ॥

No. 8818. विनायकाष्टोत्तरशतनामावलिः.

VINĀYAKĀṢṬŌTTARAŚATA NĀMĀVALIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 2*a* of the MS. described under No. 8791.

Complete. From Skāndapurāṇa.

Similar to the above.

Beginning:

स्कन्द उवाच—

देवदेव त्रिलोकेश सर्वदेवनमस्कृत ।

अस्य श्रीविनायकाष्टोत्तरशतनामस्तोत्रमन्त्रस्य महादेव ऋषिः, अनुष्टुप् छन्दः, श्रीविनायको देवता, श्रीविनायकप्रसादसिद्ध्यर्थे जपे विनियोगः ।

विनायकाय नमः । विघ्नराजाय नमः । गणनाथाय नमः । गजाननाय नमः ।

End:

शुभगाय नमः। अव्ययाय नमः ॥
इति विघ्नेश्वराष्टोत्तरशतकं सम्पूर्णम् ॥
इति सङ्कीर्तनं यस्य गणेशस्य महात्मनः।
नाम्नामष्टशतं पुण्यं पवित्रं पापनाशनम् ॥
विचार्यार्थं पठेद्यस्तु श्रद्धया तत्परो नरः।
स विधूयेह पापानि लभते च शिवं पदम् ॥

Colophon:

इति श्रीस्कन्दपुराणे उमामहेश्वरसंवादे विनायकाष्टोत्तरशतं सम्पूर्णम् ॥

No. 8819. विनायकाष्टोत्तरशतनामावलिः.
VINĀYAKĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, 12⅝ × 1⅛ inches. Pages, 49. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 16*a*. The other works herein are Triśatīnāmāvali 1*a*, Kṛṣṇāṣṭōttaraśatanāmāvali 10*a*, Rāmāṣṭōttaraśatanāmāvali 12*b*, Śivāṣṭōttaraśatanāmāvali 14*b*, Umāṣṭōttaraśatanāmāvali 18*a*, Subrahmaṇyāṣṭōttaraśatanāmāvali 20*b*, Umāṣṭōttaraśatanāmastōtra 23*a*, Subrahmaṇyasahasranāmāvali 25, Lalitāsahasranāmāvali 48*a*, Triśatīnāmāvali 76*a*, Śivasahasranāmāvali 85*a*, Viṣṇusahasranāmāvali 105*a*, Indrākṣyaṣṭōttaraśatanāmāvali 120*a*.

Complete.

Similar to the above.

Beginning:

विघ्नविनायकाय नमः। विघ्नराजाय नमः। विनायकाय नमः। गणनाथाय नमः। गजाननाय नमः।

End:

द्वारपालकाय नमः। मूर्तिस्वरूपाय नमः। श्रुतिस्वरूपाय नमः। श्रीमहागणपतये नमः ॥

Colophon:

श्रीमहागणपत्यष्टोत्तरशतं सम्पूर्णम् ॥

No. 8820. विनायकाष्टोत्तरशतनामावलिः.

VINĀYAKĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, 15¾ × 1⅛ inches. Pages, 5. Lines, 6 a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 4*a* The other works herein are Śivāṣṭōttara-śatanāmāvali 1*a*, Nāmaliṅgānuśāsana 8*a*.

Complete.

Similar to the above.

Beginning:

विनायकाय नमः । गजाननाय नमः । गणाध्यक्षाय नमः । विघ्न-राजाय नमः । द्वैमात्रे(तुराय) नमः । द्विमुखाय नमः ।

End:

समस्तशस्त्रधराय नमः । सर्वैश्वर्य[व]दायकाय नमः । वरदगण-पतये नमः । ना(ग)गणपतये नमः । विघ्नेश्वराय नमः ॥

Colophon:

विघ्नेश्वराष्टोत्तरशतं सम्पूर्णम् ॥

(*d*) GARUḌA.

No. 8821 गरुडद्वादशनामस्तोत्रम्.

GARUḌADVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 126*b* of the MS. described under No. 29.

Complete.

This gives the twelve names in praise of Garuḍa. A repetition of these names is considered to free one from fear of any danger that may arise from scorpions, snakes, thieves, enemies, etc.

Beginning:

अस्य श्रीगरुडद्वादशनामस्तोत्रमहामन्त्रस्य कश्यप ऋषिः, अनुष्टुप् छन्दः, गारुडात्मा महावीरो देवता, वृश्चिकभयसर्पभयचोरभयशत्रुभय-महाभयादिनिवारणार्थे जपे विनियोगः ।

सुपर्णं वैनतेयञ्च नागारिं नागभूषणम् ।
जितान्तकं जितामित्रमजितं विश्वतोमुखम् ॥

End:

द्वादशैतानि नामानि गरुडस्य महात्मनः ॥
यः पठेत्प्रातरुत्थाय स्थितो वा शयनेघन(ऽथवा) ।
सङ्ग्रामाभिमुखो भूत्वा जयमाप्नोति मानवः ॥

* * * *

बन्धनान्मुच्यते जन्तुर्यात्रायां सिद्धिमाप्नुयात् ॥

Colophon:

गरुड(द्वादशनाम)स्तोत्रं सम्पूर्णम् ॥

No. 8822. गरुडद्वादशनामस्तोत्रम्.
GARUḌADVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 12 on a page.

Begins on fol. 8*a* of the MS. described under No. 6176.

Wants beginning.

Similar to the above.

Beginning:

कनकरुचिरपक्षं वायुवेगं धृताहिं
हरिसुतमतिवीरं नौम्यहं वैनतेयम् ॥
मानसपूजां कृत्वा गरुडमुद्रां प्रदर्श्य स्तोत्रं पठेत् ।
सुपर्णं वैनतेयं च नागारिं नागभूषणम् ।
जितातङ्कं जितामित्रमजितं विश्वतोमुखम् ॥

End:

विषं नाक्रमते तस्य पाल(पला)यन्ते च पन्नगाः ।
बन्धनान्मुच्यते जन्तुर्यात्रायां सिद्धिमाप्नुयात् ॥

Colophon:

इति श्रीगरुडपुराणे गरुत्मद्द्वादशनामस्तोत्रं सम्पूर्णम् ॥

(e) GĀYATRĪ.

No. **8823.** गायत्रीसहस्रनामस्तोत्रम्.
GĀYATRĪSAHASRANĀMASTŌTRAM.

Pages, 5. Lines, 19 on a page.

Begins on fol. 33*b* of the MS. described under No. 2886.

Complete.

Gives 1,000 names in praise of the deity which is considered to preside over the Gāyatrīmantra. They consist of sets of names commencing with each letter of the Gāyatrīmantra. The repetition of these names is considered to have the power of ensuring victory in battle.

Beginning:

कैलासे सुखमासीनं तुषारकरशेखरम् ।
बद्धाञ्जलिं नमस्कृत्य पर्यपृच्छत शांकरी ॥

श्रीपार्वत्युवाच—

किं विन्यस्येत् त्वया देव स्वशरीरे निरन्तरम् ।
कथमेतादृशी कान्तिः कथं तेषां समृद्धयः ॥

* * * *

अस्य श्रीगायत्रीदिव्यसहस्रनामस्तोत्रमहामन्त्रस्य महेश्वर ऋषिः, अनुष्टुप् छन्दः, गायत्री देवता, धर्मार्थकाममोक्षार्थे जपे विनियोगः । ध्यानम्—

रक्तश्वेतसुवर्णनीलधवलैर्युक्तां त्रिनेत्रोज्वलां
रक्तारक्तनवस्रजं मणिगणैर्युक्तां कुमारीमिमाम् ।

गायत्रीं कमलासनां करतलैश्चक्राब्जयुग्मावहां
पद्माक्षं च जपस्रजं च दधतीं हंसाधिरूढां भजे ॥
श्रीगायत्रीसावित्रीसरस्वत्यै नमः ।
ओम् ।
तकाररूपतद्रूपा तत्पदार्थस्वरूपिणी ।
तपःस्वाध्यायनिरता तपस्वी वाग्विदां वरा ॥
तत्कीर्तिगुणसंपन्ना तथ्यावादितपोनिधिः ।

End:

यकाररूपिणी यज्ञा यादवी यादवार्चिता ।
ययातिपूजनप्रीता याज्ञिकी याचकप्रिया ॥
* * * *
सर्वयज्ञफलं देवि भवत्येव न संशयः ।
स च शत्रून् जयेत् सद्यो मातङ्गानिव केसरी ॥

Colophon:

इति श्रीवेदसारे उमामहेश्वरसंवादे गायत्रीदिव्यसहस्रनामस्तोत्रं संपूर्णम् ॥

No. **8824.** गायत्रीसहस्रनामस्तोत्रम्.

GĀYATRĪSAHASRANĀMASTŌTRAM.

Pages, 16. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 6187.

Complete.

Same as the above.

Colophon:

इत्युमामहेश्वरसंवादे गायत्रीसहस्रं सम्पूर्णम् ॥

No. **8825.** गायत्रीसहस्रनामस्तोत्रम्.

GĀYATRĪSAHASRANĀMASTŌTRAM.

Pages, 15. Lines, 24 on a page.

Begins on fol. 136*a* of the MS. described under No. 446.

Complete. From Viṣṇuyāmala

Similar to the above.

Beginning:

नारद उवाच—

भगवन् सर्वलोकेश सर्वशास्त्रार्थपारग ।
श्रुतिस्मृतिपुराणानां रहस्यं त्वन्मुखाच्छ्रुतम् ॥
सर्वपापहरं देव केनाविद्या निवर्तते ।
केन वा ब्रह्मविज्ञानं किं नु वा मोक्षसाधनम् ॥

* * * *

साधु साधु महाप्राज्ञ सम्यक्पृष्टं त्वयानघ ।
शृणु वक्ष्यामि यत्नेन गायत्यूष्टसहस्रकम् ॥

* * * *

अस्य श्रीगायत्रीसहस्रनामस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीगायत्रीसावित्रीसरस्वतीपरमात्मा देवता, हलो बीजानि, स्वराश्शक्तयः, बिन्दवः कीलकम्, मम ऐहिकामुष्मिकप्रीत्यर्थे गायत्रीसहस्रनामस्तोत्रमन्त्रजपे विनियोगः ।

अचिन्त्यालक्षणाव्यक्ता अर्यमा चामृतेश्वरी ।
अमृतार्णवमध्यस्था अजिता चापराजिता ॥
अणिमादिगुणाधारा अर्कमण्डलसंस्थिता ।
अजरा चामराचर्चा अक्षसूत्रधराधरा ॥

End:

हिरण्यवर्णा हरिणी ह्रीङ्कारी हंसवाहना ।
क्षौमवस्त्रपरीताङ्गी क्षीराब्धितनया क्षमा ॥
गायत्रीञ्चैव सावित्रीं प्रणमामि सरस्वतीम् ।
वेदगर्भां वरारोहां तोषयामि पुनः पुनः ॥
यानि नामानि लोकेषु गायत्र्याश्च मयोदितम् ।
अष्टोत्तरसहस्रं तु पठितव्यं द्विजैस्सह ॥

* * * *

इदं रहस्यममलं मयोक्तमृषिसत्तम ।
पठनाद्ब्रह्मसायुज्यं प्राप्नुवन्ति न संशयः ॥

Colophon:

इति श्रीविष्णुयामले ब्रह्मनारदसंवादे गायत्रीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. 8826. गायत्रीसहस्रनामस्तोत्रम्.

GĀYATRĪSAHASRANĀMASTŌTRAM.

Pages, 3. Lines, 19 on a page.

Begins on fol. 35*b* of the MS. described under No. 2886.

Complete.

55th Adhyāya of the Viṣṇuyāmala. Without Pīṭhikā.

Same as the above, but contains 1,008 names.

Colophon:

इति श्रीविष्णुयामिले सृष्टिप्रशंसायां ब्रह्मविष्णुसंवादे नारदप्रोक्तगायत्र्यष्टसहस्रं नाम पञ्चपञ्चाशोऽध्यायः ॥

No. 8827. गायत्रीसहस्रनामस्तोत्रम्.

GĀYATRĪSAHASRANĀMASTŌTRAM.

Substance, palm-leaf. Size, $6\frac{1}{2} \times 1$ inches. Pages, 62. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Lakṣmyaṣṭōttaraśatanāmastōtra 32*a*, Tripurasundarīstōtra 36*b*, Rāmamānasapūjā 44*a*.

Complete.

Same as the above.

No. 8828. गायत्र्यष्टोत्तरशतनामस्तोत्रम्.

GĀYATRYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 23 on a page.

Begins on fol. 155*b* of the MS. described under No. 446.

Complete.

Gives the one hundred and eight names usually pronounced in praise of the deity presiding over Gāyatrī.

Beginning:

श्रीरामचन्द्र उवाच—

विश्वामित्र महाप्राज्ञ गाधिसूनो महाव्रत ।
नाम्नामष्टोत्तरशतं गायत्र्या ब्रूहि मोक्षदम् ॥

विश्वामित्र उवाच—

साधु पृष्टं त्वया प्राज्ञ रघुवंशसमुद्वह ।
शृण्वतां पातकहरमज्ञानतिमिरापहम् ॥
गायन्तन्त्रायते यस्माद्गायत्रीत्यभिधीयते ।
ततः शृणु महाराज[न्] सर्वकामानवाप्स्यसि ॥

अस्य श्रीगायत्र्यष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषयः . . . . . मुक्ताविद्रुमेति ध्यात्वा ।

ओम् ।

तरुणादित्यसङ्काशा सहस्रनयनोज्ज्वला ।
स्यन्दनोपरिसंस्थाना धीरजीमूतनिस्वना ॥
मत्तमातङ्गगमना हिरण्यकमलासना ।
धीजनोद्धारनिरता योगिनी योगधारिणी ॥

End:

ज्योत्स्नातपेन लिप्ताङ्गी महामारुतवीजिता ।
सर्वमन्त्राश्रिताधीना पापघ्नी परमेश्वरी ॥

* * * *

रोगिणां रोगशमनं सर्वैश्वर्यप्रदायकम् ।
बहुना किमिहोक्तेन स्तोत्रं सर्वफलप्रदम् ॥

Colophon:

इति श्रीविश्वामित्रसंहितायां श्रीरामचन्द्रविश्वामित्रसंवादे गायत्र्य ष्टोत्तरशतदिव्यनामस्तोत्रं सम्पूर्णम् ॥

No. **8829.** गायत्र्यष्टोत्तरशतनामस्तोत्रम्.

GĀYATRYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 91*a* of the MS. described under **No. 6178.**

Complete.

Similar to the above.

Beginning:

श्रीराम उवाच —

विश्वामित्र महाप्राज्ञ गायत्रीमन्त्रपारग ।
श्रोतुमिच्छामि तत्त्वेन गायत्र्यष्टशतं विभो ॥

श्रीविश्वामित्र उवाच —

साधु पृष्टं त्वया प्राज्ञ रघुवंशसमुद्भव ।
गायत्र्याश्चैव सावित्र्याः सरस्वत्यास्तपोधन ॥
शतमष्टोत्तरं नाम शृणु तत्त्वेन सांप्रतम् ।

See under the previous number for the end.

Colophon:

इति श्रीविश्वामित्रसंहितायां परमरहस्ये गायत्र्यष्टोत्तरशतदिव्यनाम· स्तोत्रं संपूर्णम् ॥

No. **8830.** गायत्र्यष्टोत्तरशतनामस्तोत्रम्.

GĀYATRYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 19 on a page.

Begins on fol. 33*b* of the MS. described under **No. 2886.**

Complete. From the Viśvāmitrasaṁhitā.

Similar to the above.

Beginning:

विश्वामित्र महाप्राज्ञ गाधिसूनो महाव्रत ।
नाम्नामष्टोत्तरशतं गायत्र्या ब्रूहि मोक्षदम् ॥

* * * *

ध्यानम्—

मन्दाराह्वयरोचनाञ्जनजपापीतैर्मुखैरिन्दुम-
द्रक्तोद्यन्मकुटाङ्गसंततचतुर्विंशार्णचित्रां तनुम् ।
अम्भोजारिगदाह्वयौ गुणकपालाख्ये च पाशाङ्कुशे
इष्टाभीतिवरंचदधतिद्भवभयो(रप्रदां भवभयाभ्यु)त्तारणीं तारणीम् ॥
तरुणादित्यसंकाशा सहस्रनयनोज्वला ।
विचित्रमाल्यवसना तुहिनाचलसंस्तुता ॥

End:

रोगिणां रोगशमनं सर्वैश्वर्यप्रदायकम् ।
किमत्र बहुनोक्तेन स्तोत्रं सर्वफलप्रदम् ॥

Colophon:

इति श्रीविश्वामित्रसंहितायां परमरहस्ये गायत्र्यष्टोत्तरशतदिव्यनामामृतस्तोत्रं संपूर्णम् ॥

No. 8831. गायत्र्यष्टोत्तरशतनामस्तोत्रम्.

GĀYATRYAṢṬŌTTARAŚATANĀMAS TŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 37*a* of the MS. described under No. 29.

Complete.

See under No. 8828 for the beginning.

End:

नरो मोक्षमवाप्नोति पुनरावृत्तिवर्जितम् ।
पुत्रप्रदमपुत्राणां दरिद्राणां धनप्रदम् ॥

रोगिणां रोगशमनं सर्वैश्वर्यफलप्रदम् ।
एवं श्रीगायत्रीदेव्या नाम्नामष्टोत्तरं शतम् ॥

Colophon :

इति श्रीविश्वामित्रकल्पे गायत्र्यष्टोत्तरशतं संपूर्णम् ॥

No. 8832. गायत्र्यष्टोत्तरशतनामस्तोत्रम्.
GĀYATRYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 2*a* of the MS. described under No. 8785.

Complete.

Same as that described under No 8828 but does not contain the prefatory and the benedictory portions.

Colophon:

इति श्रीगायत्र्यष्टोत्तरशतं संपूर्णम् ॥

No. 8833. सावित्र्यष्टोत्तरशतनामस्तोत्रम्.
SĀVITRYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 92*b* of the MS. described under No. 6178.

Complete.

Similar to the above—Sāvitrī being another name for Gāyatrī.

Beginning;

अस्य श्रीसावित्र्यष्टोत्तरशतदिव्यनामस्तोत्रमहामन्त्रस्य विश्वामित्रो भगवानृषिः, गायत्री सावित्री सरस्वती देवता, ओं तत् बीजम्, भर्गः शक्तिः, धियः कीलकम्, मम सावित्रीप्रसादसिद्ध्यर्थे जपे विनियोगः .

. . . . . .

गायत्री देवमाता च सावित्री स्वपरायणी ।
सरस्वती शिवा देवी संध्या धात्री सुरेश्वरी ॥

End:

संसारोऽयमपण्डितो भगवति प्रागेव भूयः कलौ
पूर्णम्मन्यतमे जने श्रुतिशिरोगुह्यं ब्रुवे साहसात् ।
तत्र स्तोत्रमिदं प्रकाशयति यस्स्तुत्यश्च यस्तावुभौ
व्यासः कारुणिको हरिश्च तदिदं मौर्ख्यं सहेताम्मम ॥
अर्थे हरौ तदभिधायिनि नामवर्गे
तद्व्यञ्जके मयि च बद्धविशेषमेत्य ।
सेवध्वमेतदमृतं प्रणिपत्य याचे
मध्यस्थमत्सरिजना इह मा च भूवन् ॥

इह खलु निखिलोऽपि चेतयमानः प्रमाणतः प्रमेयं परिच्छिन्द-न्तश्चेत् प्रमेयमनुकूलं तदुपाददीत, यथा स्रक्चन्दनकनकादिकम् ; तच्चे-द्विपरीतमपोहेत, यथा क्षुरकण्टकादिकम् ; तच्चेदनुभयरूपमुपेक्षेत, यथा काष्ठलोष्टादिकम् । तत्र प्रत्यक्षादिप्रमाणान्तरगोचरयोरर्थकामयोरत्यल्पत्वा-नर्थकत्वबीभत्सत्वभङ्गुरत्वदुःखमिश्रत्वदुस्साधनत्वाद्यनन्तदोषानुषङ्गेण त्या-ज्यत्वात् शास्त्रप्रमेययोर्धर्मपरयोस्तद्वैपरीत्यादनन्तमङ्गलसङ्गतत्वाच्च शास्त्र-तदर्थयोरुपादेयत्वं प्रकृष्यते । यथाहुरैतिहासिकाः—

* * * *

एवंविधदोषहानगुणवत्त्वतारतम्येन उपायोपेययोस्तरतमभाव उभ-यत्रापि संभवति । उत्कृष्टतमे उत्कृष्टोत्कृष्टतरयोर्निकृष्टवद्वर्जनीयत्वमेव । तत्रानिष्टेभ्य इष्टेऽपि निकृष्टेभ्यो निकृष्योत्कृष्टतममुपादातुमुपायोपेयौ सह तारतम्येन प्रष्टव्यौ । तौ च विवक्षावशेन षोढा विभज्य पृच्छन् युधिष्ठिर उवाच—किमेकमित्यादिश्लोकद्वयेन । तत्रोपायस्योपेयार्थत्वात् प्रधानभूतमुपेयं पृच्छतस्तस्य च तत्त्वशास्त्रेषु परतत्त्वात्मना फलशास्त्रेषु परतत्त्वात्मना च द्वेधोपदेशदर्शनात् प्रथमं परतत्त्वरूपं पृच्छति—किमेकं

दैवतमिति। लोक इति प्रतिप्रश्नमनुषज्यते। भवतः परमो मत इति च सिंहावलोकनन्यायेन। यथार्हं च विभक्तिर्विपरिणमनीया। लोक्यतेऽनेनेति लोकः, श्रुतिस्मृत्यादिशरीरं शास्त्रम्।

End:

तमिममर्थं शपथेनैव विभावयन्न ते यान्ति पराभवं न ते यान्ति पराभवमित्यावृत्त्या पूरयति॥

Colophon:

इति हारीतकुलतिलकश्रीवत्साङ्कमिश्रसूनोः श्रीरङ्गराजदिव्याज्ञालब्ध-पराशरापरनामधेयस्य श्रीरङ्गनाथस्य कृतौ श्रीमन्नामसहस्रविवरणे भगवद्गुणदर्पणे निगमनं सम्पूर्णम्॥

No. 9074. विष्णुसहस्रनामभाष्यम्.

VIṢṆUSAHASRANĀMABHĀṢYAM.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 204. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

Wants beginning in the Pūrvapīṭhikā.

Same as the above.

No. 9075. विष्णुसहस्रनामभाष्यम्.

VIṢṆUSAHASRANĀMABHĀṢYAM.

Pages, 132. Lines, 8 on a page.

Begins on fol. 103*a* of the MS. described under No. 5013.

Complete.

Same as the above.

No. 9076. विष्णुसहस्रनामस्तोत्रव्याख्या.

VIṢṆUSAHASRANĀMASTÓTRAVYĀKHYA.

ubstance, paper. Size, $12\frac{5}{8} \times 8\frac{3}{8}$ inches. Pages, 256. Lines, 16 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. There is another complete copy of this work in 257 pages and beginning on fol. 129*a*.

Complete.

A commentary in accordance with the views of Śaṅkarācārya on Viṣṇusahasranāmastōtra: by Gōvinda Paṇḍita, son of Timmājināyaka and Pāpamāmbā of Bhāradvājagōtra, and disciple of Papaya Śāstrin of Kauṇḍinyagōtra.

Beginning:

शुक्लाम्बरधरं . . . . . शान्तये ॥

व्यासं वसिष्ठ . . . . . तपोनिधिम् ॥

दधीचिगौतमशापनिमित्तेन श्रुतिस्मृत्युक्तमार्गकलुषीकृ(तमानसान्) विष्णुशिवानिन्दकान् तिरस्कृत्य श्रौतस्मार्तमार्गप्रतिष्ठापनार्थं भक्तानां ब्रह्मज्ञानोपदेशार्थमनुग्रहेण कैला(साच्छ)ङ्कराचार्यरूपेणाविर्भूतं देवानां समुत्पादकं शम्भुं दानवशत्रूणां शङ्करमस्मद्गुरुं शिवं नुमः ।

अत्र प्रमाणानि . . . . . .

भारद्वाजपवित्रगोत्रोत्पन्नातिम्माजिनायकात्पापमाम्बायामुत्पन्नेन कौण्डिन्यगोत्रोत्पन्नानामुपद्रष्टा(ष्ट्र)न्वयाम्बुधिचन्द्राणां पापयशास्त्रिणां पदकमलसेवासम्पादितमतिना गोविन्देन श्रीमहाभारतानुशासनिकपर्वणि स्थितविष्णुनाम्नां सहस्रं व्याख्यायते ।

श्रीमच्छङ्कराचार्येण भाष्यं कृतं, त्वया व्याख्यानकरणे निमित्तन्नास्तीति न शङ्कनीयम् . . . . . नामसु कचिच्छब्दैक्येपि अर्थभेदाच्छब्दभेदाच्च पौनरुक्त्यं परिहरिष्यते । भाष्यानुक्तार्थ(स्यै)वात्र वक्तव्यत्वेन प्रसिद्धार्थत्यागदोषो नास्ति । यस्येति यस्य विष्णोः । विष्णवे व्यापनशीलाय । प्रभविष्णवे भक्तरक्षणार्थं रामादिरूपेण प्रभवनशीलाय । श्रुत्वेति । धर्मान् इष्टापूर्तादिधर्मान् । अशेषेण सविशेषेण । पावनानि पापनिवर्तकानि । सर्वशः कृच्छ्रान् ।

End:

न भयमिति । भयं पैशाचादिभयम् । कचिदपि कुत्रचिदपि ॥

No. 9077. वेङ्कटेशद्वादशनामस्तोत्रम्.

VĒṄKAṬĒŚADVĀDAŚANĀMASTŌTRAM.

Page, 1. Lines, 24 on a page.

Begins on fol. 116*b* of the MS. described under No. 5959.

From Brahmāṇḍapurāṇa.

Complete.

Gives the twelve eulogistic names of God Vēṅkaṭēśa who is worshipped at Tiruppati. The repetition of these twelve names at sunrise, noon and at sunset is considered to have the power of removing the troubles and diseases caused by the planets and of enabling one to realise one's objects.

Beginning :

श्रीवेङ्कटेशमतिसुन्दरमोहनाङ्गं श्रीभूमिकान्तमरविन्ददलायताक्षम् ।

* * * *

अस्य श्रीवेङ्कटेशद्वादशस्तोत्रमन्त्रस्य परब्रह्म ऋषिः, अनुष्टुप् छन्दः, वेङ्कटेशो देवता, वेङ्कटेशप्रीत्यर्थे जपे विनियोगः । अथ ध्यानम् ।

नारायणो जगन्नाथो वारिजासनवन्दितः ।
स्वामिपुष्करिणीवासः शङ्खचक्रगदाधरः ॥

End :

विश्वात्मा विश्वलोकेशो विजयो वेङ्कटेश्वरः ।
एतानि द्वादश नामानि त्रिसन्ध्यं यः पठेन्नरः ॥

* * * *

ग्रहरोगविनाशञ्च सर्वकामफलप्रदम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे वेङ्कटेशद्वादशनामस्तोत्रं सम्पूर्णम् ॥

No. 9078. वेङ्कटेशद्वादशनामस्तोत्रम्.

VĒṄKAṬĒŚADVĀDAŚANĀMASTŌTRAM.

Substance, palm-leaf. Size, 10⅛ × 1 inches. Pages, 2. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 20*a*. The other works herein are Vēṅkaṭēśasahasranāmastōtra 1*a*, Vēṅkaṭēśastōtra 21*a*, Vēṅkaṭēśāṣṭapañcāśannāmastōtra 23*a*, Cāṭuślōkas 24*a*, Rāmāyaṇaślōkas 27*a*.

Complete.

Similar to the above.

Beginning :

शेषशायी श्रीनिवासः श्रीपतिः पुरुषोत्तमः ।
वनमाली वज्रकेशी भक्ताभीष्टप्रदायकः ॥

End :

कामितार्थप्रदाता च कलौ वेङ्कटनायकः ॥

The remaining portion is the same as the above.

Colophon :

इति श्रीमद्वराहपुराणे वेङ्कटेशक्षेत्रखण्डे सूतशौनकसंवादे वेङ्कटेशद्वादशनामस्तोत्रं सम्पूर्णम् ॥

No. 9079. वेङ्कटेशसहस्रनामस्तोत्रम्.

VĒṄKAṬĒŚASAHASRANĀMASTŌTRAM

Pages, 39. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9078.

Complete. From Brahmāṇḍapurāṇa.

Gives one thousand eulogistic names of God Vēṅkaṭēśa.

Beginning :

अभीष्टफलदं . गुरुं सदा ॥ श्रीमान् वेङ्कट . सदा हृदि ॥
वैकुण्ठमेतत् . शैलशृङ्गे ॥

वसिष्ठः—

भगवन् केन विधिना नामभिर्वेङ्कटेश्वरम् ।
पूजयामास तं देवं ब्रह्मा तु कमलैश्शुभैः ॥

श्रृणोमि तानि नामानि गुणयोगपराणि किम् ।
मुख्यवृत्तीनि किं ब्रूहि लक्षकाणि कथं मुने ॥

नारदः—

नामान्यनन्तानि हरेर्गुणयोगानि कानि च ।
मुख्यवाचीनि चान्यानि लक्षकाणि पराणि हि ।

* * * *

वेङ्कटेशो विरूपाक्षो विश्वेशो विश्वभावनः ।
विश्वसृग्विश्वसंहर्ता विश्वप्राणो विराट् प्रभुः ॥

End:

ज्ञप्तिज्ञेयो ज्ञानगम्यो ज्ञानातीत(:) सुरातिगः ।
ब्रह्माण्डान्तर्बहिर्भाव्यो वेङ्कटाद्रिगदाधरः ॥

श्रीवेङ्कटाद्रिगदाधरोन्नम इत्यादि श्रुतिः ।

एवं श्रीवेङ्कटेशस्य कीर्तनं परमाद्भुतम् ।
नाम्नां सहस्रं संश्राव्यं पवित्रं पुण्यवर्धनम् ॥

* * * *

स्वामिपुष्करिणीतीरे गृहाणार्घ्यं नमोऽस्तु ते ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे वसिष्ठनारदसंवादे श्रीमद्वेङ्कटगिरिमाहात्म्ये वेङ्कटेशक्षेत्रखण्डे सूतशौनकसंवादे वेङ्कटेशसहस्रनामस्तोत्रपठनं सम्पूर्णम् ॥

No. 9080. वेङ्कटेशसहस्रनामस्तोत्रम्.

VĒṄKAṬĒŚASAHASRANĀMASTŌTRAM.

Pages, 14. Lines, 8 on a page.

Begins on fol. 27*a* of the MS. described under No. 9001.

Complete.

Same as the above, except the benedictory portion in the end.

End:

एवं श्रीवेङ्कटेशस्य कीर्तनं परमाद्भुतम् ।
नाम्नां सहस्रं संश्राव्यं पवित्रं पुण्यवर्धनम् ॥

* * * *

त्रिमासान्महदैश्वर्यं ततस्सम्भाषणं भवेत् ।
मार्गभ्रष्टस्तु सन्मार्गं गतस्वः स्वं स्वकीयकम् ॥
चाचल्यचित्तश्चा(त्तोऽचा)चल्यं मनस्संगच्छति ध्रुवम् ।
न्यूनं कर्म प्रपूर्तिं च कर्मणां समवाप्नुयात् ॥

Colophon:

इति ब्रह्माण्डपुराणे वेङ्कटाचलमाहात्म्ये वेङ्कटेशसहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. **9081.** वेङ्कटेशसहस्रनामस्तोत्रम्.

VĔṄKAṬĔŚASAHASRANĀMASTŌTRAM.

Pages, 16. Lines, 8 on a page.

Begins on fol. 194*a* of the MS. described under No. 2523.
Complete.
Same as the above excepting in the end.

End:

एवं श्रीवेङ्कटेशस्य कीर्तनं परमाद्भुतम् ।

* * * *

वेङ्कटाद्रिस(सं)स्थानं ब्रह्माण्डे नास्ति किञ्चन ।
वेङ्कटेशसमो देवो न भूतो न भविष्यति ॥

Colophon:

इति ब्रह्माण्डपुराणे वेङ्कटाचलमाहात्म्ये वसिष्ठनारदसंवादे श्रीवेङ्कटेशदिव्यसहस्रनामस्तोत्रं संपूर्णम् ॥

No. 9082. वेङ्कटेशसहस्रनामस्तोत्रम्.

VĒṄKAṬĒŚASAHASRANĀMASTŌTRAM.

Pages, 9. Lines, 8 on a page.

Begins on fol. 183*b* of the MS. described under No. 2522.

Complete.

Same as the above excepting the end.

End :

एवं श्रीवेङ्कटेशस्य कीर्तनं परमाद्भुतम् ।

* * * *

नमः श्रीवेङ्कटेशाय शुद्धज्ञानस्वरूपिणे ।

वासुदेवाय शान्ताय श्रीनिवासाय मङ्गलम् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे वेङ्कटेशसहस्रनामस्तोत्रं संपूर्णम् ॥

No. 9083. वेङ्कटेशाष्टपञ्चाशन्नामस्तोत्रम्.

VĒṄKAṬĒŚĀṢṬAPAÑCĀŚANNĀMASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 9078.

Complete.

Gives fifty-eight names in praise of God Vēṅkaṭēśa. The repetition of these names thrice a day is considered to have the power of removing all sins.

Beginning :

वेङ्कटेशो वासुदेवः प्रद्युम्नोऽमितविक्रमः ।

सङ्कर्षणोऽनिरुद्धश्च शेषाद्रिपतिरेव च ॥

जनार्दनः पद्मनाभो वेङ्कटाचलवाहनः ।

सृष्टिकर्ता जगन्नाथो माधवो भक्तवत्सलः ॥

End :

इतीदं कीर्तनीयस्य विष्णोरमिततेजसः ।

त्रिकालं यः पठेन्नित्यं पापन्तस्य न विद्यते ॥

No. 9084. वेङ्कटेशाष्टोत्तरशतनामस्तोत्रम्.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 192*a* of the MS described under No. 5661.

Complete.

Contains one hundred and eight names in praise of Vēṅkaṭēśa. The names are given in the dative case and each stanza ends with the word Namaḥ.

Beginning:

ऋषय ऊचुः—

सूत[स]सर्वार्थतत्त्वज्ञ वेदवेदाङ्गपारग ।
येन चाराधितः पूर्वं श्रीमद्वेङ्कटनायकः ॥ १ ॥

* * * *

अष्टोत्तरशतैर्दिव्यैर्नामभिर्मुनिपूजितैः ।
स्वाभीष्टं लब्धवान् ब्रह्मा सर्वलोकपितामहः ॥ ६ ॥

* * * *

अस्य श्रीवेङ्कटेश्वरनाम्नामष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य नारायण ऋषिः; अनुष्टुप् छन्दः, श्रीमहाविष्णुः परमात्मा श्रीमान्नारायणो देवता, श्रीवेङ्कटेश्वरप्रीत्यर्थे जपे विनियोगः ।

* * * *

ओन्नमो वेङ्कटेशाय शेषाद्रिनिलयाय च ।
ऋषिद्द(ग)गोचरायाथ विष्णवे सततन्नमः ॥ १ ॥

End:

हलायुधलसत्तीर्थस्नाताभीष्टप्रदायिने ॥ ३२ ॥
गोविन्दाय नमस्तुभ्यं श्रीनिवासाय ते नमः ॥
इति श्रीवेङ्कटेशस्य नाम्नामष्टोत्तरं शतम् ।
गोपनीयमिदं स्तोत्रं सर्वेषान्न प्रकाशयेत् ॥

Colophon:

वेङ्कटेश्वराष्टोत्तरशतनाम[लु] संपूर्णम् ॥

No. 9085. वेङ्कटेशाष्टोत्तरशतनामस्तोत्रम्.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. 24*b* of the MS. described under No. 5938.

Complete. From Vēṅkaṭagirimāhātmya in Varāhapurāṇa

Same as the above excepting the end.

End:

इति शेषेण कथितं कपिलाय महात्मने ॥
कपिलाख्यमहायोगिसकाशात्तु मया न(ग)तम् ।
तदुक्तं भवतामद्य पुण्यदं प्रीतये हरेः ॥

Colophon:

इति श्रीवराहपुराणे वेङ्कटगिरिमाहात्म्ये वेङ्कटेशाष्टोत्तरशतनामस्तोत्राभिधानमेकषष्टितमोऽध्यायः ॥

No. 9086. वेङ्कटेशाष्टोत्तरशतनामस्तोत्रम्.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 1. Lines, 8 on a page.

Begins on fol. 53*b* of the MS. described under No. 9001.

Complete.

Similar to the above.

Beginning:

सूत सर्वार्थतत्त्वज्ञ वेदवेदाङ्गपारग ।
येन चाराधितस्सद्यः श्रीमद्वेङ्कटनायकः ॥

* * * *

नाम्नामष्टशतस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः ।
नीलगोक्षीरसम्भूतो बीजमित्युच्यते बुधैः ॥
श्रीनिवासस्तथा शक्तिः हृदयं वेङ्कटाधिपः ।
छन्दोऽनु(ष्टु)तथा देवो वेङ्कटेश उदाहृतः ॥
विनियोगस्तथाभीष्टसिद्ध्यर्थे च निगद्यते ।
ओं नमो वेङ्कटेशाय शेषाद्रिनिलयाय च ॥
वृषदृग्गोचरायाथ विष्णवे सततं नमः ।

End:

गोपनीयमिदं स्तोत्रं सर्वेषां न प्रकाशयेत् ।
श्रद्धाभक्तियुजामेव दापयेन्नामसङ्ग्रहम् ॥

Colophon :

इति श्रीवेङ्कटेश्वराष्टोत्तरशतदिव्यनामस्तोत्रं समाप्तम् ॥

No. 9087. वेङ्कटेशाष्टोत्तरशतनामावलिः.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 23*b* of the MS. described under No. 1872.

Complete.

This is a Nāmāvali consisting of one hundred and eight names of Vēṅkaṭēśa.

Beginning :

श्रीवेङ्कटेशसहस्र(शत)नाममन्त्रजपं करिष्ये ।

श्रीमन्नारायणाद्रीशाय नमः । श्रीमदञ्जनशैलवासिने नमः । श्रीमत्सिंहनका(गा)धिपाय नमः । श्रीमद्वेङ्कटाचलनायकाय नमः ।

End:

पुरुषोत्तमाय नमः । वेङ्कटेशाय नमः ॥

Colophon :

श्रीवेङ्कटेश्वरसहस्र(शत)नाममन्त्रं संपूर्णम् ॥

No. 9088. वेङ्कटेशाष्टोत्तरशतनामावलिः.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 34*a* of the MS. described under No. 8632.

Complete.

Similar to the above.

Beginning:

वेङ्कटेशाय नमः । शेषाद्रिनिलयाय नमः । वृषदृग्गोचराय नमः । विष्णवे नमः । सतते नमः । नन्दजनगरीशाय नमः ।

End:

हलायुधजगत्तीर्थसमस्तफलदाय नमः । गोविन्दाय नमः । नित्याय नमः । श्रीनिवासाय नमः ॥

Colophon:

इति श्रीवेङ्कटेश्वराष्टोत्तरशतनामानि सम्पूर्णानि ॥

No. **9089.** वेङ्कटेशाष्टोत्तरशतनामावलिः.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 11. Lines, 4 on a page.

Begins on fol. 10*a* of the MS. described under No. 8880.

Complete.

Same as the above.

End:

गोविन्दाय नमो नित्यं श्रीनिवासाय ते नमः ।
अष्टोत्तरशतं नाम्नां चतुर्थ्या नमसान्वितम् ॥
यः पठेच्छृणुयान्नित्यं श्रद्धाभक्तिसमन्वितः ।
सत्यं श्रीवेङ्कटेशस्तु प्रसन्नो भवति ध्रुवम् ॥

No. **9090.** वेङ्कटेशाष्टोत्तरशतनामावलिः.

VĒṄKAṬĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 13. Lines, 4 on a page.

Begins on fol. 12*a* of the MS. described under No. 8903.

Complete.

Same as the above.

Beginning:

वैकुण्ठमेतत्. . . . शैलनाथे ॥

श्रीवेङ्कटेश्वराय नमः । शेषाद्रिनिलयाय नमः । वृषभाद्रिगोचराय नमः ।

Colophon:

वेङ्कटेशाष्टोत्तरशतं संपूर्णम् ॥

No. 9091. कृष्णसहस्रनामस्तोत्रम्.
KṚṢṆASAHASRANĀMASTŌTRAM.

Pages, 11. Lines, 8 on a page.

Begins on fol. 34*a* of the MS. described under No. 9001.

Complete. Forms the 119th Adhyāya of Brahmavaivarta Purāṇa.

Similar to the work described under No. 8889.

Beginning:

नमो भगवते वासुदेवाय परमात्मने ।
नमः कारणकार्याय चित्कलाय नमो नमः ॥

श्रीसनन्दन उवाच—

शङ्कर शृणु (शृणु शङ्कर) वक्ष्यामि स्तोत्रराजमनुत्तमम् ।
रहस्यं परमं वेद्यं महीयं(यो)मन्त्ररूपकम् ॥

* * * *

श्रीकृष्णाय श्रुताध्याय . . श्रीमयाय च ।
श्रीशाय श्रीनिकेताय श्रींदाय श्रीमते नमः ॥

श्रीवत्साङ्काय सिद्धाय शृङ्गाराय शिवात्मने ।
धीराय परतत्त्वाय शिष्टपालाय ते नमः ॥

End:

द्वारकापुरसाम्राज्यवल्लभाय नमो नमः ॥

एतच्छ्रीकृष्णसाहस्रनाममन्त्रमहास्तवम् ।
कीर्तयेद्यः पठेद्वापि चिन्तयेद्वा स्मरेद्यदि ॥

* * * *

हरे हरे मे हर पातकानि हरे हरे मे कुरु कौतुकानि ।
हरे हरे मे त्वयि देहि भक्तिं हरे हरे मे सततं प्रसीद ॥

Colophon :

इति श्रीब्रह्मकै(वै)वर्तकपुराणे उत्तरखण्डे शिवसनन्दनसंवादे श्रीकृष्णदिव्यसहस्रनामस्तोत्रमन्त्रो नाम एकोनविंशोत्तरशततमोऽध्यायः ॥

No. 9092. हयग्रीवसहस्रनामस्तोत्रम्.
HAYAGRĪVASAHASRANĀMASTŌTRAM.

Pages, 11. Lines, 13 on a page.

Begins on fol. 61*a* of the MS. described under No. 4338.

Complete.

Contains one thousand eulogistic names of Hayagrīva, the deity who is considered to preside over learning and who is held to be a manifestation of Viṣṇu.

It is written at the end that the transcription of the work was finished by Vānamāmalai Vēṅkaṭakṛṣṇamācārya on Monday, the thirteenth day of the lunar fortnight and the 21st of Puraṭṭāsi in the year Manmatha.

Beginning :

तात मे श्रीहयग्रीवनाम्नां साहस्रमुत्तमम् ।
अध्येतुं जायते काङ्क्षा तत् प्रसीद मयि प्रभो ॥
इति पृष्टस्ततोऽवोचत् ब्रह्मा लोकपितामहः ।
श्रीमतो हयवक्त्रस्य नाम्नां साहस्रमुत्तमम् ॥
रहस्यानां रहस्यं तत् पावनानाञ्च पावनम् ।
श्रेयसामपि च श्रेयः काश्यपोपदिशामि ते ॥

* * * *

अथ ध्यानम्—

विद्यामूर्तिमखण्डचन्द्रवलयं श्वेताविन्दस्थितं
हृद्याभं स्फटिकाद्रिनिर्मलतनुं विद्योतमानं श्रिया ।

वामाङ्कस्थितवल्लभां प्रति सदा व्याख्यातमाम्नायवा-
गर्थानादिमपूरुषं हयमुखं ध्यायामि हंसात्मकम् ॥
विश्वात्मा विशदप्रभाप्रतिलसद्वाग्देवतामण्डले
देही दक्षिणपाणियुग्मविलसद्बोधाङ्कचक्रायुधः ।
वामोदग्रकरे दरी तदितरेणाश्लिष्य दोष्णा रमां
हस्ताग्रे धृतपुस्तकस्सदयितो हंसो हिरण्यच्छदः ॥
ओम् । श्रीं हं सो हं सो हमैमों क्लीं श्री श्रीविभूषणः ।
परोरजाः परं ब्रह्म भूर्भुवस्सुवरादिमः ॥
भास्वान् भगश्च भगवान् स्वस्ति स्वाहा नमः स्वधा ॥

End:

इति हयवद(नान)नारविन्दा–
न्मधुलहरीव नि(र)र्गला गलन्ती ।
जगति दशशती तदीय[दिव्य]नाम्नां
जयति जडानपि गीर्ष(र्षु)याज(जाप)यन्ति(न्ती) ।

Colophon:

इति हयग्रीवदिव्यसहस्रनाम संपूर्णम् ॥

No. 9093. हयग्रीवाष्टोत्तरशतनामस्तोत्रम्.

HAYAGRĪVĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 4*b* of the MS. described under No. 6090.

Complete.

Contains one hundred and eight names in praise of Hayagrīva A repetition of these names is considered to bestow learning, intelligence, wealth, pleasures and salvation.

Beginning:

श्रृण्वन्तु ऋषयस्सर्वे हयास्यस्य महात्मनः ।
नाम्नामष्टोत्तरशतं महासारस्वतप्रदम् ॥
हयग्रीवो महाविष्णुः केशवो मधुसूदनः ।
गोविन्दः पुण्डरीकाक्षो विष्णुर्विश्वंभरो हरिः ॥

आदित्यस्सर्ववागीशस्सर्वाधारस्सनातनः ।
निराधारो निराकारो निरीशो निरुपद्रवः ॥

End :

शुद्धस्फटिकसंकाशो जटामण्डलमण्डितः ॥
आदिमध्यान्तरहितः सर्ववागीश्वरेश्वरः ।
नाम्नामष्टोत्तरशतं हयग्रीवस्य यः पठेत् ॥
सर्ववेदाङ्गवेदान्तशास्त्राणां पारगः कविः ।
वाचस्पतिसमो बुद्ध्या सर्वतीर्थविशारदः ॥
महदैश्वर्यमासाद्य कलत्राणि च पुत्रवान् ।
अवाप्य सकलान् भोगान् अन्ते हरिपदं व्रजेत् ॥

Colophon :

इति श्रीहयग्रीवाष्टोत्तरशतदिव्यनामामृतस्तोत्रं संपूर्णम् ॥

No. 9094. हयग्रीवाष्टोत्तरशतनामस्तोत्रम्.

HAYAGRĪVĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 33*b* of the MS. described under **No. 5858.**

Complete.

Same as the above.

No. 9095. हयग्रीवाष्टोत्तरशतनामस्तोत्रम्.

HAYAGRĪVĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 7 on a page.

Begins on fol. 39*b* of the MS. described under **No. 7698.**

Complete.

Same as the above.

No. 9096. हयग्रीवाष्टोत्तरशतनामावलिः.
HAYAGRĪVĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 29*a* of the MS. described under No. 8532.

Complete.

The same names as are found in the work described above are here given separately.

Beginning:

श्रीहयग्रीवाय नमः । महाविष्णवे नमः । केशवाय नमः । मधुसूदनाय नमः । गोविन्दाय नमः । पुण्डरीकाक्षाय नमः । विष्णवे नमः ।

End:

हंसाय नमः । परमहंसाय नमः । विश्वगोप्त्रे नमः । विराजे नमः । स्वराजे नमः । शुद्धस्फटिकसङ्काशाय नमः । जटामण्डलसंयुताय नमः । आदिमध्यान्तरहिताय नमः । सर्ववागीश्वराय ईश्वराय नमः ॥

Colophon:

हयग्रीवाष्टोत्तरशतनामावलिः संपूर्णा ॥

No. 9097. अप्रमेयाष्टोत्तरशतनामस्तोत्रम्.
APRAMĒYĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 50*a* of the MS. described under No. 9001.

Complete. From Brahmāṇḍapurāṇa.

Gives 108 names in praise of God Apramēya worshipped in the temple at Mēlūr in Mysore.

Beginning:

महादेव विरूपाक्ष शङ्कर त्रिपुरान्तक ।
श्रुत्वा तव मुखाम्भोजान्माहात्म्यं कमलापतेः ॥

* * * *

अप्रमेयो लोकनाथः करुणामृतसागरः ।
विश्वेश्वरो विश्वरूपी विश्वभुग्विश्वमङ्गलः ॥

End:

ज्ञानमण्टपमध्यस्थो रामो नारायणो नरः ।
इति श्रीसुरवन्द्यस्य देवस्यामेयरूपिणः ॥
नाम्नामष्टोत्तरं दिव्यमप्रमेयस्य शार्ङ्गिणः ।
* * * *
अष्टोत्तरशतेनैवमनेन कमलापतिम् ।
सद्यस्समर्चितं देवमप्रमेयं महेश्वरम् ॥

द्विजान(ति)वर्या(र्य)स्तुतिदानि(न)मन्त्र(न्त्रैः)सम्पूज्य देवं कमलासमेतम् ।
भक्त्या विनम्रो भगवांस्तदानीं स्तोत्रं जगत्कारणमप्रमेयम् ॥

Colophon:

इति ब्रह्माण्डपुराणे क्षेत्रमाहात्म्यकाण्डे शिवनारदसंवादे श्रीमज्ज्ञान-मण्टपमाहात्म्ये श्रीअप्रमेयाष्टोत्तरशतनामस्तोत्रं नामैकादशोऽध्यायः ॥

No. **9098.** कृष्णाष्टोत्तरशतनामस्तोत्रम्.
KṚṢṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 53*a* of the MS. described under No. 9001.

Complete.

Same as the work described under No. 8893.

No. **9099.** नृसिंहसहस्रनामस्तोत्रम्.
NṚSIṀHASAHASRANĀMASTŌTRAM.

Pages, 17. Lines, 8 on a page.

Begins on fol. 19*a* of the MS. described under No. 9001.

Complete.

Same as the work described under No. 8943.

Colophon :

इति श्रीनारसिंहप्रादुर्भावे पुराणे [नारसिंहप्रादुर्भावे] सर्वार्थप्रदं नाम ब्रह्मणा निर्मितं श्रीनारासिंहसहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. 9100. नृसिंहाष्टोत्तरशतनामस्तोत्रम्.

NṚSIṀHĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 49*a* of the MS. described under No. 9001.

Complete.

Similar to the work described under No. 8946.

Beginning :

अस्य श्रीनृसिंहाष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य पुरन्दर ऋषिः, अनुष्टुप छन्दः, श्रीनृसिंहो देवता, श्रीं ह्रीं क्ष्रौं ह्रीं बीजं, श्रीनृसिंह-प्रसादसिद्ध्यर्थे जपे विनियोगः ।

श्रीनृसिंहो महादेव उपेन्द्रश्चाग्निलोचनः ॥
रौद्रस्सर्वात्मकश्चैव महावीरस्सुविक्रमः ।

End :

गुरुर्लोकगुरुश्श्रेष्ठः परंज्योतिः परायणः ।
इत्येतन्नारासिंहस्य नाम्नामष्टोत्तरं शतम् ॥

* * * *

अग्रतो नारासिंहस्य पृष्ठतो वायुनन्दनः ।
उभयपार्श्वतश्चैव सचरौ रामलक्ष्मणौ ॥

Colophon :

इति श्रीनृसिंहाष्टोत्तरशतदिव्यनामस्तोत्रं समाप्तम् ॥

No. 9101. रङ्गनाथाष्टोत्तरशतनामस्तोत्रम्.

RAṄGANĀTHĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 51*a* of the MS. described under No. 9001.

Complete.

Similar to the work described under No. 8961.

Beginning:

यदृच्छयागतं प्राज्ञं देवर्षिममितप्रभम् ।
प्रह्लादो नारदं दृष्ट्वा प्राणिपत्य कृताञ्जलिः ॥
श्रीरङ्गनायकस्यैव नाम्नामष्टोत्तरं शतम् ।
रहस्यमपि पप्रच्छ तत्सर्वं विनयान्वितः ॥

* * * *

रङ्गशायी रङ्गधामा रङ्गवासी तथा पुनः ।
रङ्गभूमा रङ्गराजो रङ्गनाथोऽव्ययः सदा ॥

End:

अष्टोत्तरशतं दिव्यं स्तोत्रं श्रीरङ्गशायिनः ।
पठन् शृण्वन् लिखन् बिभ्रद्रङ्गेशे भक्तिमाप्नुयात् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे प्रह्लादनारदसंवादे श्रीरङ्गब्रह्मविद्यायां मन्त्ररहस्ये श्रीरङ्गनाथाष्टोत्तरशतदिव्यनामस्तोत्रं नाम सप्ततितमोऽध्यायः ॥

(*n*) KĀRTAVĪRYĀRJUNA.

No. 9102. कार्तवीर्याष्टोत्तरशतनामस्तोत्रम्.
KĀRTAVĪRYĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 56*a* of the MS. described under No. 9001.

Complete.

This gives 108 names in praise of Kārtavīryārjuna who was a powerful king of ancient times. A repetition of these names is considered to protect one from all evils and dangers.

Beginning:

कार्तवीर्यार्जुनो धन्वी योगीन्द्रो हेहयेश्वरः ।
दत्तात्रेयप्रियतमः सहस्रभुजमाण्डितः ॥
चापी खड्गी रथी बाणी तूणी वर्मी महाबलः ।
सुभगः सुमुखः शान्तः चक्रवर्ती गुणाकरः ॥

End:

सर्वज्ञाननिधिः सौम्यः सिद्धदानि(न)कृतोद्यमः ।
इत्यष्टशतनामोक्तमूर्तयो दशदिक्पतेः ॥
सम्यक् दश दिशो व्याप्य पालयन्तु च मां सदा ।
स्वस्थाः सर्वे बुधाः पान्तु शान्तिरस्तु च मां सदा ॥
एषां ये(या)मूर्तयोऽष्टौ च दिक्क्रमेणैव भास्वराः ।
अग्निनैर्ऋतिवाय्वीशकोणगाः पान्तु मां सदा ॥

Colophon:

इति कार्तवीर्यार्जुनाष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥

(*o*) GAṄGĀ

No. **9103.** गङ्गासहस्रनामस्तोत्रम्.

GAṄGĀSAHASRANĀMASTŌTRAM.

Pages, 33. Lines, 5 on a page.

Begins on fol. 138*a* of the MS. described under No. **204**.

Complete.

One thousand names in praise of the river Ganges.

Beginning:

अन्तस्तिमिरानिर्भेदभानवे कामधेनवे ।
सदान्तेवासिनां कल्पतरवे गुरवे नमः ॥

* * * *

नाम्नां सहस्रं गङ्गायाः स्तवराजेषु शोभनम् ।
जपानां परमं जप्यं वेदोपनिषदां समम् ॥

* * * *

ओंकाररूपिण्यजरा कुलानन्दामृतस्रवा ।
अत्युदारभयाशोकालकनन्दामृतालया ॥

End:

गङ्गास्नानप्रतिनिधि स्तोत्रमेतन्मयेरितम् ।
सुस्नाय जाह्नवी(व्यां) तस्मादेतत् स्तोत्रं जपेत् सुधीः ॥

Colophon:

इति श्रीस्कान्दपुराणे काशीखण्डे स्कन्दागस्त्यसंवादे गङ्गासहस्रनाम एकोनत्रिंशत्तमोऽध्यायः ॥

(*p*) TULASĪ.

No. **9104.** तुलस्यष्टोत्तरशतनामावलिः.

TULASYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 70*a* of the MS. described under No. 6152.

Complete.

A list of 108 names in praise of Tulasī (the holy basil), which is considered to be sacred and dear to Viṣṇu and hence used in his worship.

Beginning:

वनराजाय(ज्यै) नमः । आदिदेव्यै नमः । विष्णुप्रियायै नमः । देवदेव्यै नमः । आमोदायै नमः । नन्दायै नमः । सुनन्दायै नमः । सुमनोदायै नमः ।

End:

सत्त्वायै नमः । रजसे नमः । तमसे नमः । सोममण्डलायै नमः । तुलस्यै नमः । . . . . . सर्वदेवनमस्कृतायै नमः । नमस्कारम् । श्रीतुलस्यै नमः । सर्वोपचारान् समर्पयामि ॥

(*q*) VIṬṬHALĀCĀRYA.

No. **9105.** विट्ठलाष्टोत्तरशतनामस्तोत्रम्.

VIṬṬHALĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 28 on a page.

Begins on fol. 106*b* of the MS. described under No. 2981.

Complete.

This gives 108 names in praise of Viṭṭhalācārya, son and disciple of Vallabhācārya, the founder of the Vallabha sect of Vaiṣṇavas. These names are said to have been taught by Mahādēva, and their repetition is considered to lead one to the good graces of Rādhākānta (Kṛṣṇa).

Beginning:

श्रीमद्वल्लभसत्सुधाजलनिधिप्रोद्भूतमत्यद्भुतं
भूमीभूषणमक्षयं नवघनश्यामङ्कलाकारम् ।
पित्रा हीरकरञ्जितद्युतित(क)रं नक्तन्दिवाह्लादकं
नामन्नाममहन्नमामि शशिनं श्रीविट्ठलेशाभिधम् ॥
श्रीविट्ठलेश्वरस्याहं नान्नामष्टोत्तरं शतम् ।
वक्ष्ये श्रीराधिकाकान्ताधरपीयूषपीतये ॥
सर्वोद्धारप्रयत्नात्मा श्रीमद्वल्लभनन्दनः ।
महालक्ष्मीतत्त्वजात्मा रुक्मिणीप्राणवल्लभः ॥

End:

लोकवेदसमाख्यातपुरुषोत्तमनामकः ॥
महादेवसमाख्यातमनन्तेष्वपि नामसु ।
अष्टोत्तरशतं नान्नां श्रीविट्ठलेश्वरस्य यः ॥
पठति प्रेमसंयुक्तः प्रत्यहं भाग्यवान्नरः ।
राधाकान्तप्रियो भूत्वा पिबेत्तदधरामृतम् ॥

Colophon:

इति श्रीमहादेवप्रोक्तं श्रीविट्ठलेश्वराष्टोत्तरशतं नाम सम्पूर्णम् ॥

(*r*) VĒDĀNTADĒŚIKA.

No. 9106. वेदान्तदेशिकसहस्रनामस्तोत्रम्.

VEDĀNTADĒŚIKASAHASRANĀMASTŌTRAM.

Pages, 60. Lines, 6 on a page.

Begins on fol. 10 *a* of the MS. described under No. 3117, wherein this has been mentioned as Dēśikasahasranāman.

Complete.

One thousand names descriptive of the virtues and acts of **Vēṅkaṭanātha**, well known as Vēdāntadēśika : by Gōpāladēśika of Ātrēyagōtra.

Beginning:

अखिलभुवनरक्षासाधनायावतीर्णे
कुमतिकलिविलासध्वान्ततिग्मांशुजाले ।
निरवधिकरुणाब्धौ वेदचूडागुरौ मे
भवतु परममक्तिर्वेङ्कटेशाभिधाने ॥

अस्मद्देशिकतद्गुरून् श्रुतिशिरश्चूडार्यरामानुजौ
रङ्गेशं रघुपुङ्गवानुजगुरुं श्रीमन्नतार्तिच्छिदम् ।
श्रीरामानुजपूर्णयामुनमुनीन् रामारविन्देक्षणौ
नाथश्रीशठकोपसैन्यरमणश्रीश्रीपतीन् भावये ॥

श्रीमत्त्रयीशेखरदेशिकस्य नाम्नां सहस्रं गुणतः क्रियातः ।
प्रख्यातमख्यातिनिरासि सर्वसम्पत्प्रदं साधुमुदे तनोमि ॥

वेङ्कटेशकृपालब्धानन्तार्यस्वप्नचिन्तितः ।
तोतारम्बागर्भसूर्यः संख्याब्दावासभासुरः ॥

मधुसूदनरङ्गेशसाकूतेक्षितजन्मकः ।
नभस्यश्रवणश्रीशतीर्थवासरजन्मवान् ॥

दीपप्रकाशनिकटसन्नाविर्भावभासुरः ।
श्रीशघण्टावतारत्वज्ञापकानेकयुक्तिमान् ॥

End:

आचार्यकृत्यवित् शिष्यकृत्यवेदनदीक्षितः ॥
सौम्यकार्त्तिकराकाश्रीपर्यङ्कारोहिणीप्रियः ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

Colophon:

इत्यात्रेयकृष्णार्यतनूजेन तच्चरणकमलचञ्चरीकेण श्रीमद्वेदान्तरामानुजयोगीन्द्रमहादेशिककटाक्षलब्धवेदान्तरहस्यजालेन गोपालदेशिकेन विरचितं देशिकसहस्रनाम सम्पूर्णम् ॥

The scribe adds:—

गोपालदेशिककृतं देशिकस्तोत्रमुत्तमम् ।
भक्त्या कस्तूरिरङ्गार्यशिष्येण लिखितम्मया ॥

(*s*) VIKHANAS.

No. **9107. विखनस्सप्तदशनामानि.**

VIKHANASSAPTADAŚANĀMĀNI.

Page, 1. Lines, 3 on a page.

Begins on fol. 226*a* of the MS. described under No. 5661, wherein this has been mentioned as Vaikhānasasaptadaśanāman.

Complete.

Seventeen names in praise of the sage Vikhanas who is the author of a Kalpasūtra and the founder of the Vaikhānasa sect of Vaiṣṇavas.

Beginning:

श्रीविष्णुस्थापनाचार्यः सर्वज्ञो ब्रह्महृद्भवः ।
वानप्रस्थश्च विखनाः अनघो गर्भवैष्णवः ॥

End:

महामुनिर्हरिप्रार्थ्यः सर्वसूत्राहितागमः ॥
आगमज्ञमुनेस्सप्तदश नामानि सूरिभिः ।
प्रोक्तानि कलुषघ्नानि श्रवणात्पठनात्सदा ॥

Colophon:

इति विखनसस्सप्तदश नामानि समाप्तानि ॥

(*t*) ŚAKTI.

No. **9108. अन्नपूर्णाष्टोत्तरशतनामस्तोत्रम्.**

ANNAPŪRṆĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 66*b* of the MS. described under No. 5987 and not on 66*a* as shown therein.

Complete. From Brahmōttarakhaṇḍa.

Contains 108 names in praise of Annapūrṇā, a manifestation of Śakti.

Beginning:

अस्य श्रीअन्नपूर्णाष्टोत्तरनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीअन्नपूर्णा देवता ।

* * * *

अन्नपूर्णा शिवा देवी भीमा पुष्टिः सरस्वती ।
सर्वज्ञा पार्वती दुर्गा शर्वाणी शिववल्लभा ॥
वेदवेद्या महाविद्या विद्यादात्री विशारदा ।
कुमारी युवती बाला लक्ष्मीः श्रीभयहारिणी ॥

End:

महाभगवती दक्षा दक्षाध्वरविनाशिनी ।
नित्यसुन्दरसर्वाङ्गी सच्चिदानन्दलक्षणा ॥
नाम्नामष्टोत्तरशतमम्बायाः पुण्यकारणम् ।
सर्वसौभाग्यसिद्ध्यर्थं जपनीयं प्रयत्नतः ॥

* * * *

एतानि दिव्यनामानि कृत्वा ध्यात्वा निरन्तरम् ।
स्तुत्वा देवीञ्च सततं सर्वान् कामानवाप्नुयात् ॥

Colophon:

इति श्रीब्रह्मोत्तरखण्डे आगमप्रख्याताशिवरहस्ये अन्नपूर्णादिव्याष्टोत्तर-शतनामस्तोत्रं सम्पूर्णम् ॥

No. 9109. अन्नपूर्णाष्टोत्तरशतनामावलिः.

ANNAPŪRṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Page, 1. **Lines**, 5 on a page.

Begins on fol 56*b* of the MS. described under No. 5987.

Incomplete.

The same names as are found in the work described under the last number are here given separately.

Beginning:

ओं अन्नपूर्णायै नमः । शिवायै नमः । ओं देव्यै नमः । ओं भीमायै नमः ।

End:

ओं कुमार्यै नमः । ओं युवत्यै नमः । ओं बालायै नमः । ओं [illegible] (तायै नमः)।

No. 9110. अन्नपूर्णाष्टोत्तरशतनामावलिः.

ANNAPŪRṆĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 64*a* of the MS. described under No. 5987.

Complete.

Same as the above except in the end.

End:

ओं नित्यसुन्दरसर्वाङ्गयै नमः । ओं सच्चिदानन्दलक्षण्यै नमः ॥
ओं नानाविधपरिमलपुष्पाणि समर्पयामि ॥

No. 9111. कालिकासहस्रनामस्तोत्रम्.

KĀLIKĀSAHASRANĀMASTŌTRAM.

Substance, palm-leaf. Size, $8\frac{3}{5} \times 1$ inches. Pages, 38. Lines, 4 on a page. Character, Telugu Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Kālikāsahasranāmāvali 20*a*.

Complete.

Gives 1,000 names in praise of Kālī or Śakti.

Beginning:

ओं । क्रीं काली क्रूं कराली च कल्याणी कमला कला ।
कलावती कलाढ्या च कलापूजा कलात्मिका ॥
कलाहृष्टा कलापुष्टा कलामस्ता कलारका ।
कलाकोटिसमाभासा कलाकोटिप्रपूजिता ॥

End:

कौतुकी कौमुदी काली कौमारी कौरवार्चिता।
कौण्डिन्या कौशली क्रोधज्वालाभासुररूपिणी॥
क्रों क्रौं फट् मन्त्रवर्णक्रीं ह्रीं ह्रं हुं फट्समन्वधा।
क्रीं क्रीं क्रीं क्रीं ह्रीं ह्रीं हुं हुं ह्रं फट्स्वाहा मन्त्ररूपिणि(णी)॥

Colophon:

इति (श्री)सर्वसाम्राज्यमेधानामसहस्रकम्।

No. 9112. कालिकासहस्रनामावलिः.

KĀLIKĀSAHASRANĀMĀVALIḤ.

Pages, 64. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 9111.

Complete.

Same names as are found in the above.

Beginning:

ओं क्रीं काल्यै नमः। ओं क्रूं कराल्यै नमः। कल्याण्यै नमः। कमलायै नमः। कलावत्यै नमः। कलाध्या(द्या)यै नमः।

End:

कल्याणाभरणोज्ज्वलायै नमः। कल्याणवेदिकान्तःस्थायै नमः। कल्याणव्रजतोषितायै नमः। श्रीकाल्यै नमः। श्रीमहात्रिपुरसुन्दर्यै नमः।

No. 9113. कालीसहस्रनामावलि.

KĀLĪSAHASRANĀMĀVALIḤ.

Pages, 28. Lines, 10 on a page.

Begins on fol. 11*a* of the MS. described under No. 4567, wherein this has been omitted to be mentioned in the list of other works.

Incomplete.

Similar to the above.

Beginning:

अथर्वणोद्भवायै नमः । काल्यै नमः । भद्रकाल्यै नमः । कपालिन्यै नमः । गुह्यकाल्यै नमः । महाकाल्यै नमः ।

End:

उग्रकृत्यायै नमः । भीमरूपायै नमः । सर्वशत्रुनिवारिण्यै नमः । सर्वजनमोहिन्यै नमः ॥

No. 9114. देवीत्रिशतीनामस्तोत्रम्.

DĒVĪTRIŚATĪNĀMASTŌTRAM.

Pages, 21. Lines, 16 on a page.

Begins on fol. 170*b* of the MS. described under No. 424, wherein this has been mentioned among the other works as Lalitātriśatīstōtra.

Complete. From Brahmāṇḍapurāṇa.

Gives three hundred names in praise of Lalitātripurasundarī, a manifestation of Śakti.

Beginning:

अगस्त्य उवाच—

हयग्रीव दयासिन्धो भगवन् भक्तवत्सल ।
त्वत्तः श्रुतमशेषेण श्रोतव्यं यद्यदस्ति तत् ॥
रहस्यं नामसाहस्रमपि त्वत्तः श्रुतम्मया ।
अतः परन्तु मे नास्ति श्रोतव्यमिति निश्चयः ॥

* * * *

तस्मादेकाग्रमनसा श्रोतव्यञ्च त्वया सदा ।
इत्युक्त्वा तं हयग्रीवः प्रोचे नाम्नां शतत्रयीम् ॥

* * * *

ओं(क)काररूपा कल्याणी कल्याणगुणशालिनी ।
कल्याणशैलनिलया कमनीया कलावती ॥
कमलाक्षी कल्मषघ्नी करुणारससागरा ।
कदम्बकाननावासा कदम्बकुसुमप्रिया ॥

End:

ह्रीङ्कारा हिमवद्गङ्गा ह्रीङ्कारार्णवकौस्तुभा ।
ह्रीङ्कारमन्त्रसर्वस्वा ह्रीङ्कारपरसौख्यदा ॥
इतीदं ते मयाख्यातं दिव्यं नाम्नां शतत्रयम् ।
रहस्यातिरहस्यं तद्गोपनीयन्त्वया मुने ॥

* * * *

स्तोत्रेणानेन ललिता नुता त्रिपुरसुन्दरी ।
आनन्दलहरीमग्नः सद्यः पुलकितो भवेत् ॥

Colophon:

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे ललितोपाख्याने अगस्त्यहयग्रीव-संवादे स्तोत्रखण्डे ललितात्रिशतीनामस्तोत्रं सम्पूर्णम् ॥

No. 9115. देवीत्रिशतीनामस्तोत्रम्.

DĒVĪTRIŚATĪNĀMASTŌTRAM.

Pages, 6. Lines, 6 on a page.

Begins on fol. 109*a* of the MS. described under Nos. 537 and 7247, wherein this has been mentioned as Lalitātriśatī in the list of other works.

Complete.

Same work as the above without Pūrvapīṭhikā and Uttara-pīṭhikā.

No. 9116. देवीत्रिशतीनामस्तोत्रम्.
DĒVĪTRIŚATĪNĀMASTŌTRAM.

Pages, 7. Lines, 8 on a page.

Begins on fol. 40*a* of the MS. described under No. 675, wherein this has been mentioned among the other works as Lalitā-triśatīstōtra.

Complete.

Same as the above without Pūrvōttarapīṭhikās.

No. 9117. देवीत्रिशतीनामस्तोत्रम्.
DĒVĪTRIŚATĪNĀMASTŌTRAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 109*a* of the MS. described under No. 235, wherein this has been mentioned as Lalitātriśatī.

Complete.

Same as the above.

No. 9118. देवीत्रिशतीनामस्तोत्रम्.
DĒVĪTRIŚATĪNĀMASTŌTRAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 119*a* of the MS. described under No. 124.

Complete.

Same as the above.

End:

आनन्दलहरीमग्नमानसः समवर्तत ॥

Colophon:

इति कामेश्वरकृतं सर्वपूर्तिकरस्तोत्रं संपूर्णम् ॥

No. 9119. देवीत्रिशतीनामस्तोत्रम्.
DĒVĪTRIŚATĪNĀMASTŌTRAM.

Pages, 14. Lines, 20 on a page.

Begins on fol. 24*a* of the MS. described under No. 5643, wherein this has been mentioned as Triśatīstōtra.

Complete.

Same as the last.

No. 9120. देवीत्रिशतीनामस्तोत्रम्.

DĒVĪTRIŚATĪNĀMASTŌTRAM.

Pages, 20. Lines, 19 on a page.

Begins on fol. 153*a* of the MS. described under No. 7784, wherein this has been mentioned as Triśatī.

Complete.

Same as the above except colophon which is the same as in No. 9113.

No. 9121. देवीत्रिशतीनामस्तोत्रम्.

DĒVĪTRIŚATĪNĀMASTŌTRAM.

Pages, 7. Lines, 7 on a page.

Begins on fol. 173*a* of the MS. described under No. 2848, wherein this has been mentioned among the other works as Dēvīviṁśatistōtra.

Complete.

Same as the above without Pūrvapīṭhikā and Uttarapīṭhikā.

End:

इति हयमुखगीतं स्तोत्रराजं निशम्य प्रगलितकलुषौघश्चित्तपर्याप्तिमेत्य ।
निजगुरु . . . . पुनरधिकरहस्यं ज्ञातुमेवं जगाद ॥

No. 9122. देवीत्रिशतीनामस्तोत्रम्.

DĒVĪTRIŚATĪNĀMASTŌTRAM.

Substance, palm-leaf. Size, 9½ × 1¼ inches. Pages, 22. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 28*a*. The other works herein are Lalitāsahasranāmastōtra 1*a*, Pārvatyaṣṭōttaraśatanāmastōtra 39*a*, Tri-

purasundarīmālāmantra 40*a*, Lalitāpañcaviṁśatināmastōtra 43*b*, Bhāvanōpaniṣad 44*b*, Atharvaṇabhadrakālīmahāmantra 47*a*, Cāmuṇḍīmālāmantra 48*b*, Ātmayajanavidhi 54*a*, Śivajñānabōdha 57*a*.

Complete.

Same work as the one described under No. 9114, but without the colophon.

No. 9123. देवीत्रिशतीनामस्तोत्रम्.

DĒVĪTRIŚATĪNĀMASTŌTRAM.

Substance, palm-leaf. Size, $10\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 6. Lines, 5 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 36*a*. The other works herein are Lalitāsahasranāmastōtra 1*a*, Dēvīpañcadaśākṣarastōtra 28*a*, Dēvīmālāmantra 40*a*, Gurustōtra 41*a*.

Wants beginning and end.

Same work as the above.

No. 9124. देवीत्रिशतीनामार्थप्रकाशिका.

DĒVĪTRIŚATĪNĀMĀRTHAPRAKĀŚIKĀ.

Pages, 58. Lines, 25 on a page.

Begins on fol. 89*b* of the MS. described under No. 5694, wherein this work has been mentioned as Triśatībhāṣya in the list of other works given therein.

Complete.

Same work as the one described under R. No. 226(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I—A.

No. 9125. देवीत्रिशतीनामार्थप्रकाशिका.

DĒVĪTRIŚATĪNĀMĀRTHAPRAKĀŚIKĀ.

Pages, 135. Lines, 19 on a page.

Begins on fol. 1*a* of the MS. described under No. 524.

Complete.

Same work as the one described under R. No. 226(*a*) of the Triennial Catalogue of MSS., Vol. I, Part I—A, with the addition of the one stanza in the beginning which is given below :—

Beginning :

हेमाद्रिं किल मातुलुङ्गफलमित्यादाय मोदाधिको
मौग्ध्यान्नाकनिवासिनां भयभरैर्वामैरधः प्रार्थितः ।
नीवीशम्बरनीलमम्बरतलं जम्बूफलं भावयन्
तं मुञ्चन् गिरिमम्बरं परिमृशन् लम्बोदरः पातु नः ॥

No. 9126. देवीत्रिशतीनामावलिः.

DĒVĪTRIŚATĪNĀMĀVALIḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 8632.

Complete.

An enumeration of the three hundred names of the goddess Dēvī as used in the conduct of her worship. Each name is given in the dative case and is followed by the word Namaḥ.

Beginning :

ककाररूपायै नमः । कल्याण्यै नमः । कल्याणगुणशालिन्यै नमः । कल्याणशैलनिलयायै नमः । कमनीयायै नमः । कलावत्यै नमः ।

End :

ह्रीङ्काराहिमवद्गङ्गायै नमः । ह्रीङ्कारार्णवकौस्तुभायै नमः । ह्रीङ्कार-मन्त्रसर्वस्वायै नमः । ह्रीङ्कारपदसौख्यदायै नमः ॥

इत्येतत्ते मयाख्यातं दिव्यं नाम्नां शतत्रयम् ॥

Colophon :

इति ललितात्रिशतीनाम संपूर्णम् ॥

No. 9127. देवीत्रिशतीनामावलिः.

DĒVĪTRIŚATĪNĀMĀVALIḤ.

Substance, palm-leaf. Size, 16×1¼ inches. Pages, 12. Lines, 6 on a page. Character, Grantha. Condition, slightly injured Appearance, old.

Begins on fol. 32*a*. The other works herein are Śivasahasranāmāvali 1*a*, Lalitāsahasranāmāvali 15*a*

Complete.

Same as the above.

This manuscript is stated to have been copied by one Appuvayyan, son of Kēśavayyan of Veṇmaṇi, on the 20th day of the month of Aippiśi in the year Vijaya.

No. 9128. देवीत्रिशतीनामावलिः.

DĒVĪTRIŚATĪNĀMĀVALIḤ.

Pages, 20. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 8857.

Complete.

Same work as the above.

No. 9129. देवीत्रिशतीनामावलिः.

DĒVĪTRIŚATĪNĀMĀVALIḤ.

Pages, 19. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. desrcribed under No. 8819.

Complete.

Same work as the above.

No. 9130. देवीत्रिशतीनामावलिः.

DĒVĪTRIŚATĪNĀMĀVALIḤ.

Pages, 18. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 8819.

Complete.

Same as the above.

No. 9131. देवीत्रिशतीनामावलिः.
DĒVĪTRIŚATĪNĀMĀVALIḤ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 23*a* of the MS. described under No. 8848.

Complete.

Same as the above.

No. 9132. देव्यष्टोत्तरशतनामस्तोत्रम्.
DĒVYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 115*a* of the MS. described under No. 235.

Incomplete.

In praise of the goddess Dēvī under one hundred and eight significant names denoting her. Its repetition is considered to have the power to enable one to accomplish one's desires.

Beginning and End:

अस्य श्रीदेव्यष्टोत्तरशतनामामृतस्तोत्रमन्त्रस्य ईश्वर ऋषिः, अनुष्टुप् छन्दः, श्रीमहादेवी देवता, ऐं बीजम्, क्लीं शक्तिः, सौः कीलकं, सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

पाशाङ्कुशे च वरदाभयपुस्तहस्तां
पीताम्बरां कनकमौक्तिकभूषिताङ्गीम् ।
अष्टादशाक्षरकलावृतपद्मवासा-
मेकाक्षरीं त्रिभुवनाधिपतिं नमामि ॥

ओं ह्रैं श्रीं क्लीम् ।

No. 9133. देव्यष्टोत्तरशतनामस्तोत्रम्.
DĒVYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No. 8788.

Complete.

Similar to the above.

Beginning :

महासंमोहिनी देवी सुन्दरी भुवनेश्वरी ।
एकाक्षरी महामाता एकाङ्गी एकनायकी ॥

End :

चतुर्भुजा च ह्रींकारी त्रैलोक्यावनतत्परा ।
शैलेन्द्रतनया देवी गा(य)त्री त्रिपुराम्बिका ॥

No. **9134.** देव्यष्टोत्तरशतनामस्तोत्रम्.
DĒVYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 8819.
Complete.

Same work as the above, but with the addition in the end shown below :—

अष्टोत्तरशतं देव्यास्त्रिसन्ध्यं यः पठेन्नरः ।
सर्वाभीष्टमवाप्नोति सर्वरोगविवर्जितः ॥

No. **9135.** देव्यष्टोत्तरशतनामस्तोत्रम्.
DĒVYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 2037.
Complete.
Similar to the above.

Beginning :

देवदेवी महादेवी सर्वज्ञी भुवनेश्वरी ।
नाम्नामष्टशतं वक्ष्ये उमायाः शृणु षण्मुख ॥
उमा संभो(मो)गि(हि)नी देवी सुन्दरी भुवनेश्वरी ।
एकाक्षरी महामन्त्री एकाङ्गी एकनायकी ॥

End:

त्रैलोक्यजननी देवी नमस्ते विश्वनायकी ।
एतच्छताक्षरं नाम स्तोत्रमीश्वरभाषितम् ॥

* * * *

त्रिकाले यः पठेन्नित्यं सर्वशत्रुविनाशनम् ।
चतुष्काले पठेन्नित्यं सर्वकाममवाप्नुयात् ॥

No. 9136. देव्यष्टोत्तरशतनामावलिः.

DĒVYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 5*a* of the MS. described under No. 8788, wherein this work has been mentioned as Tripurasundaryaṣṭōttaraśatanāmāvali in the list of other works givin therein.

Complete.

An enumeration of the one hundred and eight significant names of the goddess Dēvī as used in the conduct of her worship.

Beginning:

ओं महासंमोहिन्यै नमः । देव्यै नमः । सुन्दर्य्यै नमः । भुवनेश्वर्यै नमः । एकाक्षर्यै नमः ।

End:

रुद्रस्य देवस्य पत्न्यै नमः । उग्रस्य देवस्य पत्न्यै नमः । भीमस्य देवस्य पत्न्यै नमः । महतो देवस्य पत्न्यै नमः ॥

मन्त्रपुष्पं समर्पयामि ॥

No. 9137. देव्यष्टोत्तरशतनामावलिः.

DĒVYAṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 8819.

Complete.

Same as the above.

No. 9138. पराष्टोत्तरशतनामस्तोत्रम्.
PARĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 149*a* of the MS. described under No. 673.

Complete; as found in the Śārasvatatantra.

In praise of the goddess Parā, who is the same as Śakti, under one hundred and eight significant names denoting her.

Its repetition in the morning, noon and evening is held to have the power to enable one to obtain happiness here and salvation hereafter.

Beginning:

अस्य श्रीपराष्टोत्तरशतदिव्यनामस्तोत्रमहामन्त्रस्य सच्चिदानन्दभैरव ऋषिः, अनुष्टुप् छन्दः, श्रीपराम्बा देवता, हं बीजम्, नमः शक्तिः, सो हं कीलकम्, मम पराम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

श्रीवाणी मानिता माता शृङ्गारा रुचिरुज्वला ।
शृङ्गारमण्डपप्रान्ता चतुष्पद(थ)निवासभूः ॥

End:

एवं निर्वातशायिन्या नाम्नामष्टोत्तरं शतम् ॥
परायाः पठितं येन स महेशः परात्परः ।
त्रिसन्ध्यं यः पठेद्विद्वान् भोगमोक्षप्रदं नृणाम् ॥

Colophon:

इति श्रीसारस्वततन्त्रे श्रीपराष्टोत्तरशतदिव्यनामस्तोत्रं संपूर्णम् ॥

No. 9139. पराष्टोत्तरशतनामस्तोत्रम्.
PARĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 18*a* of the MS. described under No. 6187, wherein this work has been mentioned as Parāṣṭōttaraśata in the list of other works given therein.

Complete.

Same as the above.

No. 9140. परासहस्रनामस्तोत्रम्.

PARĀSAHASRANĀMASTŌTRAM.

Pages, 16. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 6187.

Complete.

In praise of the goddess Parā, who is the same as Śakti by repeating one thousand significant names denoting her.

Beginning:

अस्य श्रीपरासहस्रनामस्तोत्रमहामन्त्रस्य सच्चिदानन्दभैरव ऋषिः, श्रीपराम्बा देवता ।

* * * *

आनन्दसिन्धुरानन्दा नन्दमूर्तिविनोदिनी ।
त्रिपुरी सुन्दरी प्रेमपाथोनिधिरनुत्तमा ॥

End:

आस्वादमस्य यो वेद वेदस्तस्य वशे स्थितः ।
आनन्दसुन्दरीध्यानसुन्दरीनामकीर्तनात् ॥
परानन्दाभ्यासयोगे परानन्दा प्रजायते ॥

Colophon:

इति श्री(म)त्सारस्व(त)तन्त्रे नित्याषोडशोक्तपरासहस्रनामस्तोत्रं सम्पूर्णम् ॥

No. 9141. परासहस्रनामस्तोत्रम्.

PARĀSAHASRANĀMASTŌTRAM.

Pages, 18. Lines, 6 on a page.

Begins on fol. 150*a* of the MS. described under No. 673.

Complete.

Same as the above.

No. 9142. पार्वत्यष्टोत्तरशतनामस्तोत्रम्.

PĀRVATYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 9122.

Complete.

Similar to the work described under No. 9135.

The goddess Pārvatī is the same as Dēvī.

Beginning:

अस्य श्रीपार्वत्यष्टोत्तरशतदिव्यनामस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, हिमवत्पुत्री देवता, श्रीदेवीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

पार्वती हिमवत्पुत्री गौरी भगवती शिवा ।
महादेवी महासेना शाम्भवी परमेश्वरी ॥
उमा भवानी रुद्राणी मृडानी सर्वमङ्गला ।
चन्द्रार्धशेखरापर्णा शंकरार्धशरीरिणी ॥

End:

आनन्दरूपानन्दस्था परमानन्ददायिनी ।
व्यापिनी चानवच्छिन्ना सर्वभूताशयस्थिता ॥
इदं रहस्यं पार्वत्या नाम्नामष्टोत्तरं शतम् ।
पठतां सर्वपापघ्नं सर्वाभीष्टफलप्रदम् ॥
आयुरारोग्यमैश्वर्यं पुत्रसिद्धिमवाप्नुयात् ॥

No. 9143. पीताम्बरीसहस्रनामस्तोत्रम्.

PĪTĀMBARĪSAHASRANĀMASTŌTRAM.

Pages, 20. Lines, 6 on a page.

Begins on fol. 32*a* of the MS. described under No. 5686.

Complete.

Similar to the work described under No. 9140.

The goddess Pītāmbarī is a manifestation of Śakti.

Beginning :

सुरासुरप्रधाने तु देवदेवमहेश्वरम् ।
शैलाधिराजतनया सम्यग्विधमुवाच ह ॥

श्रीदेव्युवाच —

परमेश परंधाम प्रधानपुरुषोत्तम ।
नाम्नां सहस्रं बगलामुख्याः कथय वल्लभ ॥

ईश्वर उवाच—

शृणु देवि प्रवक्ष्यामि नामधेयसहस्रकम् ।
परब्रह्मास्त्रविद्यायाश्चतुर्वर्गफलप्रदम् ॥

* * * *

ब्रह्मास्त्र(ा)ब्रह्मविद्या च ब्रह्मभूता सनातनी ।
ब्रह्मेशी ब्रह्मबगला बगला ब्रह्मचारिणी ॥

End :

स्तम्भिताश्च सुराः सर्वे स्तवराजस्य कीर्तनात् ।
सहस्रनाममालायाः प्रीयतां परमेश्वरी ॥

Colophon :

इति उक्तशाम्बरे नगरेन्द्रप्रणयतन्त्रे षोडशसहस्रेषु विष्णुशङ्कर-संवादे पीताम्बरीसहस्रनामस्तोत्रं संपूर्णम् ॥

No 9144. पीताम्बरीसहस्रनामस्तोत्रम्.

PĪTĀMBARĪSAHASRANĀMASTŌTRAM.

Pages, 22. Lines, 19 on a page.

Begins on fol. 106*b* of the MS. described under No. 524.

Complete; as found in the Jayadrathayāmalatantra.

Similar to the above.

Beginning :

सुरालये प्रधाने तु देवदेवं महेश्वरम् ।
शैलाधिराजतनया सङ्क्षे वाचमुवाच ह ॥

श्रादेव्युवाच—

परमेश परंधाम प्रधानपुरुषेश्वर ।
नाम्नां सहस्रं बगलामुख्याः कथय वल्लभ ॥
* * * *
ब्रह्मास्त्रा ब्रह्मविद्या च ब्रह्मभूता सनातनी ।
ब्रह्मादिब्रह्मकैवल्यबगला ब्रह्मचारिणी ॥

End:

उपेन्द्रप्रियनारी च महातेजोवतीति च ।
पररूपा परा देवी त्रैलोक्याकर्षकारिणी ॥
इत्येवं कथितं देवीपीतानामसहस्रकम् ।
पठेद्योऽनुदिनं सोऽद्य सर्वसिद्धिर्भवेत्प्रिये ॥
* * * *
स्तवस्यास्य प्रभावेन शिवेन सह मोदते ।
स्तविताः श्या(स्युः) सुराः सर्वे स्तवराजस्य कीर्तनात् ॥

Colophon:

इति जयद्रथयामलतन्त्रे षोडशसहस्रे शिवविष्णुसंवादे पीताम्बरी-सहस्रनामस्तोत्रं संपूर्णम् ॥

No. **9145.** पीताम्बर्यष्टोत्तरशतनामस्तोत्रम्.

PĪTĀMBARYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 104*a* of the MS. described under No. 524.

Complete.

Similar to the work described under No. 9142.

Beginning:

पीताम्बरी विशालाक्षी पीतभूषणभूषिणी ।
पीतपुष्पैरलङ्कृत्य पीतच्छत्रविराजिता ॥
पीतध्यानपरे देवि पीतस्तम्भनकारिणी ।
पितामहादिविनुता नितरां मुक्तिदायिनी ॥

End :

ज्वालामुखी शतमुखी वडबामुखिरौद्रिणी ।
वाराहमुखि चोल्का च बगलामुखिमे(रे)व च ॥
एतैर्नामामृतैर्दिव्यैः यः पठेद्भक्तिसंयुतः ।
सर्वसिद्धिकरश्चैव बगला सुप्रसीदति ॥

Colophon :

इति श्रीपीताम्बर्यष्टोत्तरशतनाम सम्पूर्णम् ॥

No. **9146.** बालात्रिपुरसुन्दरीसहस्रनामस्तोत्रम्.
BĀLĀTRIPURASUNDARĪSAHASRANĀMASTŌTRAM.

Pages, 11. Lines, 6 on a page.

Begins on fol. 97*a* of the MS. described under Nos. 537 and 7247.

Complete.

In praise of the goddess Tripurasundarī, a manifestation of Śakti under one thousand significant names. The concluding stanza describes well the effects due to the repetition of this Stōtra.

The transcription of this manuscript is stated to have been completed on Friday, the 2nd day of the dark fortnight of the month of Puṣya, in the year Bhava.

Beginning :

भगवन् भसिता(भूषिता)शेषसिद्धान्त(विशेष)करुणानिधे ।
देव्यास्त्रिपुरसुन्दर्या मन्त्रं नामसहस्रकम् ॥

* * * *

अस्य श्रीबालात्रिपुरसुन्दरीदिव्यसहस्रनामामृतस्तोत्रमहामन्त्रस्य ईश्वरी(र) ऋषिः, अनुष्टुप्छन्दः, श्रीबालात्रिपुरसुन्दरी सरस्वती देवता ।

* * * *

सुभगा सुन्दरी सौम्या सुषुम्ना सुषुमावती ।
मनोज्ञा सुमनो(ना)रम्या शोभना ललिता शिवा ॥

End:

वज्रिणी द्राविणी जैत्री गोमुखी गोमती ध्रुवा ।
परन्तेजोमयी संवित्पूर्णानन्दाधिवासिनी ॥
इति त्रिपुरसुन्दर्या मन्त्रनामसहस्रकम् ।
कथितं सर्वदेवेशि रहस्यं सर्वकामदम् ॥
सर्वदुःखप्रशमनं सर्वपापप्रणाशनम् ।
सर्वदारिद्र्यशमनं सर्वदुःखनिवारणम् ॥

Colophon:

इति श्रीबालासहस्रनाम संपूर्णम् ॥

No. 9147. बालात्रिपुरसुन्दरीसहस्रनामस्तोत्रम्.

BĀLĀTRIPURASUNDARĪSAHASRANĀMASTŌTRAM.

Substance, palm-leaf. Size, $12\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 14. Lines, 5 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 38*a*. The other works herein are Raghuvaṁśa 1*a*, Dvipada (Kanarese) 4*a*, Śivalikhitōddhārakrama 8*a*, Ambāstava 12*a*, Śivasahasranāmāvali 16*a*, Bālātripurasundarīsahasranāmāvali 28*a*, Śivasahasranāmastōtra 45*a*, Trividhaliṅgamaṇipradīpikā 52*a*, Pañcāmṛtaśruti 54*a*, Śivakavaca 57*a*, Pañcaratna 59*b*, Karṇāṭakagītā 60*a*, Bhartṛharisubhāṣita 61*a*, Dēvīmāhātmya 64*a*, Jātavēdasamantra 132*a*, Narasiṁhastōtra 133*a*, Tryambakamantra 134*a*, Mahāgaṇapatimantra 135*b*, Antarmātṛkānyāsa 137*a*, Nāmatrayamantra 144*a*, 147*a*, Pratyaṅgirāsūkta 145*a*, Indrākṣīstōtra 146*a*, Viṣṇustōtra 148*a*.

Complete ; as found in Rudrayāmilatantra.

Same work as the above.

End:

एवमेतस्य मन्त्रस्य प्रभावो वर्णितो मया ।
न शक्यते वरारोहे कल्पकोटिशतैरपि ॥

* * * *

Colophon :

इति श्रीरुद्रयामिलमहातन्त्रे त्रिपुरसुन्दरीसहस्रनामस्तोत्रं संपूर्णम् ॥

No. **9148.** बालात्रिपुरसुन्दरीसहस्रनामस्तोत्रम्.

BĀLĀTRIPURASUNDARĪSAHASRANĀMAsTŌTRAM.

Pages, 53. Lines, 5 on a page.

Begins on fol. 41*a* of the MS. described under No. 4384, wherein this work has been mentioned as ' Bālāsahasranāma ' in the list of other works given therein.

Complete.

Same work as the above.

No. **9149.** बालात्रिपुरसुन्दरीसहस्रनामस्तोत्रम्.

BĀLĀTRIPURASUNDARĪSAHASRANĀMAsTŌTRAM.

Pages, 52. Lines, 6 on a page.

Begins on fol. 147*a* of the MS. described under No. 2040, wherein this work has been mentioned as ' Tripurasundarīṣōḍaśī-mahāmantrasahasranāmastōtra ' in the list of other works given therein.

Complete.

Similar to the above.

Beginning :

समाध्युपरतं कान्तमेकदा विजने मुदा ।
परमानन्दसंदोहतुन्दिलं प्राह पार्वती ॥
श्रीमन्नाथ तवानन्दकारणं ब्रूहि शंकर ।
योगीन्द्रोपास्य देवेश प्रेमपूर्ण दयानिधे ॥

* * *

आनन्दासिन्धुरानन्दानन्दमूर्तिर्विनोदिनी ।
त्रैपुरी सुन्दरी प्रेमपाथोनिधिरनुत्तमा ॥
रासोल्लासपरामूर्तिर्विभूतिः शङ्करी शिवा ।
शृङ्गारमूर्तिर्वरदा वरानुभवगोचरा ॥

End:

निष्प्रपञ्चप्रपञ्चाभा महामायाप्रपञ्चसूः ।
सर्वविद्योत्पत्तिदात्री परमानन्दसुन्दरी ॥
इत्येतत्कथितं दिव्यं परमानन्दकारणम् ।
लावण्यसिन्धुलहरीसुन्दरीतोषमन्दिरम् ॥
* * * *
आस्वादसुन्दरीध्यानात्सुन्दरीनामकीर्तनात् ।
सदानन्दाभ्यासयोगात्सदानन्दः प्रजायते ॥

Colophon:

इति श्रीसारसर्वस्वनित्याषोडशार्णोक्तं श्रीमन्महात्रिपुरसुन्दरीषोडशी-मन्त्रसहस्रनामस्तोत्रं संपूर्णम् ॥

No. 9150. बालात्रिपुरसुन्दरीसहस्रनामस्तोत्रम्.
BĀLĀTRIPURASUNDARĪSAHASRANĀMA-STŌTRAM.

Pages, 18. Lines, 5 on a page.

Begins on fol. 66*a* of the MS. described under Nos. 537 and 7247.

Similar to the above.

Complete; as found in the Rudrayāmala.

The transcription of this manuscript is said to have been completed by Mājēṭi Sarvēśaliṅga on Wednesday, the 11th day of the dark fortnight of the month of Āṣāḍha, in the year Bhava.

Beginning:

भैरव उवाच—
अधुना देवि वक्ष्यामि मन्त्रनामसहस्रकम् ।
महात्रिपुरसुन्दर्यास्तत्त्वविद्याविभूषणम् ॥

देव्युवाच—
भगवन् करुणाम्भोधे सर्वभूतोपकारकम् ।
महात्रिपुरसुन्दर्या मन्त्रगर्भं सहस्रधा ॥
* * * *

अस्य श्रीबालात्रिपुरसुन्दरीतत्त्वविद्यामन्त्रगर्भनामसहस्रस्य भैरव ऋषिः, पङ्क्तिश्छन्दः, श्रीबालात्रिपुराम्बा देवता, त्रिपुरसुन्दरीतत्त्वविद्यामन्त्रगर्भनामसहस्रपाठे विनियोगः । ओं ह्रीं श्रीं त्रिपुरा देवी । ऐं क्लीं सौः त्रियक्षरी । श्रीं ह्रीं ओं त्रिपुरावासा । ओं ऐं क्लीं त्रिपुरेश्वरी ।

End:

ऐं सौः क्लीं श्रीं त्रिकूटा ओं त्रिरूपा षोडशाक्षरी ।
आ देवी श्रीतत्त्वविद्या श्रीमहात्रिपुरसुन्दरी ॥

इति त्रिपुरसुन्दर्या मन्त्रनामसहस्रकम् ।
मन्त्रगर्भं महामन्त्रं साधनं साधकेष्टदम् ॥

इदं रहस्यं परमं तव भक्त्या प्रकाशितम् ।
गुह्यातिगुह्यं गोप्तव्यं गोपनीयं स्वयोनिवत् ॥

Colophon:

इति श्रीरुद्रयामले त्रिपुरसुन्दरीतत्त्वविद्यामन्त्रगर्भनामसहस्रकं संपूर्णम् ॥

No. **9151.** बालात्रिपुरसुन्दरीसहस्रनामावलिः.

BĀLĀTRIPURASUNDARĪSAHASRANĀMĀVALIḤ.

Pages, 19. **Lines**, 7 on a page.

Begins on fol. 28*a* of the MS. described under No. 9147.

Complete.

Gives a list of the thousand names of the goddess Bālātripurasundarī in the dative case follwed by the word **नमः** as used in worship.

Beginning:

सुभगायै नमः । सुन्दर्यै नमः । सौम्यायै नमः । सुषुम्नायै नमः । मनोज्ञायै नमः । सुमनायै नमः । रम्यायै नमः । शोभनायै नमः । ललितायै नमः । शिवायै नमः ।

End:

सर्वभाग्यदायै नमः । सर्वमङ्गलायै नमः । परतत्त्वमय्यै नमः । संविदे नमः । पूर्णपीठनिवासिन्यै नमः ॥

Colophon:

इति दशमशतकम् ॥

देवीसहस्रनाम समाप्तम् ॥

No. **9152.** बालात्रिपुरसुन्दरीसहस्रनामावलिः.

BĀLĀTRIPURASUNDARĪSAHASRANĀMĀVALIḤ.

Pages, 6. Lines, 18 on a page.

Begins on fol. 19*b* of the MS. described under No. 125, wherein this work has been mentioned as 'Tripurasundarīsahasranāmāvali' in the list of other works given therein.

Incomplete.

Same as the above, but with the following additional stanzas in the end :—

कथितं तव देवेशि रहस्यं सर्वकामदम् ।
सर्वरोगहरं पुण्यं सर्वोपद्रवनाशनम् ॥

* * * *

एवमेतस्य मन्त्रस्य प्रभावो वर्णितुं मया ।
न शक्यते वरारोहे कल्पकोटिशतैरपि ॥

Colophon:

इति श्रीरुद्रयामिलतन्त्रे त्रिपुरसुन्दरीनामसहस्रस्तोत्रं संपूर्णम् ॥

No. **9153.** बालात्रिपुरसुन्दरीसहस्रनामावलिः.

BĀLĀTRIPURASUNDARĪSAHASRANĀMĀVALIḤ.

Pages, 6. Lines, 17 on a page.

Begins on fol. 11*a* of the MS. described under No. 125, wherein this work has been omitted to be included in the list of other works given therein.

Complete.

Same work as the above.

No. 9154. बालात्रिपुरसुन्दरीसहस्रनामावलिः.

BĀLĀTRIPURASUNDARĪSAHASRANĀMĀVALIḤ.

Pages, 29. Lines, 15 on a page.

Begins on fol. 14*a* of the MS. described under No. 5615.

Complete.

Same as the above.

No. 9155. बालात्रिपुरसुन्दरीसहस्रनामावलिः.

BĀLĀTRIPURASUNDARĪSAHASRANĀMAVALIḤ.

Pages, 20. Lines, 11 on a page.

Begins on fol. 29*a* of the MS. described under No. 5615, wherein this work has been mentioned as 'Dēvīsahasranāmāvali' in the list of other works.

Complete.

Same as the above.

No. 9156. बालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्.

BĀLĀTRIPURASUNDARYAṢṬŌTTARAŚATA-NĀMASTŌTRAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 88*a* of the MS. described under No. 4384, wherein this work has been mentioned as 'Bālāṣṭōttaraśatanāmāvali' in the list of other works.

Wants beginning.

Similar to the work described under No. 9142.

The goddess Bālātripurasundarī is only a manifestation of Pārvatī.

Beginning:

दिव्यैकरूपा मूर्तात्मा सर्वलोकैकपूजिता ।
सर्वचक्रात्मसर्वज्ञा नाम्ना श्रीशिव मु(उ)क्तवान् ॥
येन तुष्टा भवेद्देवी श्रीबाला परमेश्वरी ।

* * * *

वाचस्पतेः समाराध्या वाचि लक्ष्मीसमर्चिता ।

End:

विनीताय विधेयाय सर्वज्ञाय (महात्मने) ।
स्नेह(लोभ)वञ्चन[ष्टवि]हीनाय दद्यादाचार्यसंगिने ॥

Colophon:

इति श्रीत्रिपुरागमे पञ्चपञ्चाशः पटलः ॥
बालाष्टोत्तरशतं संपूर्णम् ॥

No. **9157.** बालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्.
BĀLĀTRIPURASUNDARYAṢṬŌTTARAŚATA-NĀMASTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 6192.

Complete; as found in the Rudrayāmala.

Similar to the above.

Beginning:

कल्याणी त्रिपुरा बाला माया त्रिपुरसुन्दरी ।
सौन्दर्याम्बा भगवती ह्रींकारी सर्वमङ्गला ॥

End:

त्रिकोणमध्यनिलया षट्कोणपुरवासिनी ।
नवकोणपुरावासी बिन्दूत्पलसमन्विता ॥
नाम्नामष्टोत्तरशतं पठते न्यासमन्त्रितम् ॥

Colophon:

इति श्रीरुद्रयामले उमामहेश्वरसंवादे बालाष्टोत्तरशतदिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

No. **9158.** बालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्.
BĀLĀTRIPURASUNDARYAṢṬŌTTARAŚATA-NĀMASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5858.

Complete.

Similar to the above.

The due repetition of this Stōtra is held to have the power to enable one to accomplish one's desires.

Beginning:

अस्य श्रीबालात्रिपुरसुन्दर्यष्टोत्तरशतदिव्यनामामृतस्तोत्रमन्त्रस्य दक्षिणामूर्तिः ऋषिः, पङ्क्तिश्छन्दः, श्रीबालात्रिपुरसुन्दरी देवता ।

* * * *

अम्बा माता महालक्ष्मीः सुन्दरी भुवनेश्वरी ।
शिवा भवानी चिद्रूपा त्रिपुरा भवरूपिणी ॥

End:

इष्टदा धनदा शान्तिस्त्रिकोणान्तरमध्यगा ।
त्रिखण्डामृतसम्पूज्या श्रीमत्त्रिपुरसुन्दरी ॥
स्तोत्रेणानेन देवेशं(शीं) विधुमण्डलमध्यगम्(म्) ।
ध्यायेद्बालां महादेवीं सर्वकामार्थसिद्धये ॥

Colophon:

इति श्रीबालात्रिपुरसुन्दर्यष्टोत्तरशतं सम्पूर्णम् ॥

No. 9159. बालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रम्.

BĀLĀTRIPURASUNDARYAṢṬŌTTARAŚATA-NĀMASTŌTRAM.

Page, 1. Lines, 9 on a page.

Begins on fol. 244*b* of the MS. described under No. 124.

Complete; as found in the Kulārṇavasaṁhitā.

Similar to the above.

Beginning:

अस्य श्रीबालात्रिपुरसुन्दर्यष्टोत्तरशतनामस्तोत्रमन्त्रस्य आनन्दभैरव ऋषिः, विराट् छन्दः, श्रीबालात्रिपुरसुन्दरी देवता, मम श्रीबाला . . . . योगः ।

कल्याणी त्रिपुरा बाला माया त्रिपुरसुन्दरी ।
सौन्दर्युमा भाग्यवती ह्रींकारी सर्वमङ्गला ॥

Beginning:

अस्य श्रीब्रह्मास्त्रबगलामुखीपीताम्बरीसहस्रनामस्तोत्रमन्त्रस्य श्रीभगवान् सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीजगद्वश्यकरी पीताम्बरी देवता, सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः । मूलेन कराङ्गन्यासः ।

* * * *

ब्रह्मास्त्रा ब्रह्मविद्या च ब्रह्मभूता सनातनी ।
ब्राह्मी ब्रह्मकपाली च बगला ब्रह्मचारिणी ॥
नित्यानन्दा नित्यरूपा नित्यसिद्धिर्निरामया ।
संहारिणी महामाया कटाक्षाक्षयकारिणी ॥

End:

यशोदानन्दतनया नन्दनोद्यानवासिनी ।
नागान्तिका नागवृता नागपत्नी च नागिनी ॥

No. 9164. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMA-STŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 10*a* of the MS. described under No. 5686.

Complete.

Similar to the work described under No. 9142.

The goddess Bhuvanēśvarī is a manifestation of Pārvatī.

Beginning:

अस्य श्रीभुवनेश्वरीदिव्यनामामृताष्टोत्तरशतादिव्यनामस्तोत्रमहामन्त्रस्य ईश्वरभगवानृषिः, अनुष्टुप् छन्दः, श्रीभुवनाम्बा देवता, ऐं बीजम्, ह्रीं शक्तिः, स्वाहा कीलकं, श्रीभुवनाम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

* * * *

End:

महासंमोहिनी देवी सुन्दरी भुवनेश्वरी ।
एकाक्षरी महामायी एकाङ्गी एकनायिका ॥

कुमारी पिङ्गली चैव वारुणी जनमोहिनी ।
महेशी विश्वमाता च नमस्ते भवनायिका ॥
अष्टोत्तरशतं नाम्नां स्तोत्रमीश्वरभाषितम् ।
भक्त्या यस्तु पठेन्नित्यं धनधान्यसमृद्धिमान् ॥
चतुष्काले पठेन्नित्यं प्रसन्ना तं सरस्वती ।
सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ॥
शरण्ये त्र्यम्बके देवि नारायणि नमोऽस्तु ते ।

No. 9165. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMA-STŌTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 42*a* of the MS. described under No. 6414, wherein this work has been mentioned as Bhuvanēśvarīstōtra.

Complete.

Same work as the above, but with the addition of the following colophon :—

Colophon :

इति श्रीभुवनेश्वरी(र्यष्टोत्तरशतनाम)स्तोत्रं संपूर्णम् ॥

No. 9166. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMA-STŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 106*a* of the MS. described under No. 7247, wherein this work has been mentioned as Bhuvanēśvarīstōtra in the list of other works given therein

Complete.

Same work as the above, but with the addition of the Mantra relating to the goddess given at the end.

No. 9167. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMAsTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 17*a* of the MS. described under No. 5559, wherein this work has been mentioned as Bhuvanēśvarīstōtra in the list of other works given therein.

Complete.

Same work as the above.

No. 9168. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMASTŌTRAM

Pages, 3. Lines, 6 on a page.

Begins on fol. 43*a* of the MS. described under No. 5661.

Complete.

Same as the above.

Colophon:

इति श्रीभुवनेश्वर्यष्टोत्तरशतनामस्तोत्रं संपूर्णम् ॥

No. 9169. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 146*a* of the MS. described under No. 781, wherein this work has been mentioned as Bhuvanēśvarīstōtra in the list of other works given therein.

Complete.

Same work as the above, but with the difference in the beginning as given below :—

Beginning:

अस्य श्रीभुवनेश्वरीब्रह्मविद्यामहामन्त्रस्य वेदव्यासभगवानृषिः, अनुष्टुप् छन्दः, श्रीभुवनेश्वरी ब्रह्मविद्या देवता, ह्रां बीजं, स्वाहा शक्तिः, ह्रं कीलकं, मम श्रीभुवनेश्वर्यादिशक्तिप्रसादसिद्ध्यर्थे जपमहं करिष्ये ।

No. 9170. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 7*a* of the MS. described under No. 831, wherein this work has been mentioned as Bhuvanēśvarīstōtra in the list of other works given therein.

Complete.

Similar to the above. The repetition of these names of praise is held to be efficacious in causing the accomplishment of the four Puruṣārthas or principal aims of life, viz., Dharma, Artha, Kāma and Mōkṣa.

Beginning:

अस्य श्रीभुवनेश्वरी(र्यष्टोत्तरशतनामस्तोत्र)मन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीभुवनेश्वरी देवता, ओं बीजं, ह्रीं शक्तिः, क्रों कीलकं, मम चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ।

* * * *

अष्टोत्तरशतं वक्ष्ये उमया शृणु षण्मुख ।

End:

या माणिक्यमनोज्ञकान्तिरमला सिन्दूरभासानिभा
तारानायकशेखरी त्रिणयनी पीनस्तनोद्वा(द्वा)सिनी ।
बन्धूकप्रसवारुणाम्बरधरा मार्ताण्डकोट्युज्ज्वला
सा साद्य(दद्या)द्भुवनेश्वरी भगवती श्रेयांसि भूयांसि नः ॥
चतुर्भुजे चन्द्रकलावतंसे कुचोन्नते कुङ्कुमरागशोणे ।
पुण्ड्रेक्षुपाशाङ्कुशपुष्पबाणहस्ते नमस्ते जगदेकबन्धो ॥

Colophon:

भुवनेश्वरीस्तोत्रं संपूर्णम् ॥

No. 9171. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 6. Lines, 4 on a page.

Begins on fol. 255*a* of the MS. described under No. 119, wherein this work has been mentioned as Bhuvanēśvarīstōtra in the list of other works given therein.

Complete.

Same as the above.

No. 9172. भुवनेश्वर्यष्टोत्तरशतनामस्तोत्रम्.

BHUVANĒŚVARYAṢṬŌTTARAŚATANĀMAṢTŌTRAM.

Pages, 7. Lines, 5 on a page.

Begins on fol. 26*a* of the MS. described under No. 6101, wherein this work has been mentioned as "Ambāstuti" in the list of other works.

Wants beginning.

Same work as the above, with difference in the end as given below:—

End:

भुक्तिमुक्तिकरं चैव सर्वसिद्धिफलप्रदम् ।
त्रिसप्तकुलसंयुक्तं शिवसायुज्यमाप्नुयात् ॥

No. 9173. रत्यादिशक्तिनामानि.

RATYĀDIŚAKTINĀMĀNI.

Pages, 2. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 6192.

Incomplete.

Gives a series of significant names of praise denoting the goddess Śakti, beginning with the name 'Ratyambā.'

Beginning:

रत्यम्बा, प्रीत्यम्बा, विजयाम्बा, डाकिनी, काकिनी, वाकिनी, शाकिनी, साकिनी, हाकिनी.

End:

सर्वबीजमुद्राम्बा, सर्वयोनिमुद्राम्बा, सर्वत्रिकण्ठमुद्राम्बा.

No. 9174. राजराजेश्वरीवर्णमालिकाष्टोत्तरशतनामस्तोत्रम्.

RĀJARĀJĒŚVARĪVARṆAMĀLIKĀṢṬŌTTARA-ŚATANĀMASTŌTRAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 60*b* of the MS. described under No. 2886.

Complete.

In praise of the goddess Rājarājēśvarī who is a manifestation of Śakti through the repetition of one hundred and eight significant names. The fifteen-lettered Mantra-formula relating to her is also found in this Stōtra.

Beginning:

कैलासाद्रिमहाशृङ्गे कनत्कनकशोभिते ।
मन्दारविटपिप्रान्ते बृन्दारकनिषेविते ॥

* * * *

श्रीशिवः—

अथ ते सम्प्रवक्ष्यामि गुह्याद्गुह्यमनुत्तमम् ।
ललितायाः पञ्चदशाक्षरीमन्त्रात्मकं स्तवम् ॥
नाम्नामष्टोत्तरशतं सर्वाभीष्टप्रदायकम् ।

* * * *

कलावती कलानाथलसन्मकुटमस्तका ।
करुणापूर्णनयना कनकाङ्गदभूषणा ॥
कनत्कङ्कणभूषाढ्या कल्पद्रुमनिकेतना ।
कमलासनमौनीन्द्रवन्द्यमानपदाम्बुजा ॥

End:

इदं(मं)स्तवं श्रीत्रिपुराम्बिकायाः
पठेत्पुमान् योऽनुदिनं च भक्त्या ।
इहानुभुक्त्वा सकलांश्च भोगान्
अन्ते च देवीपदमाप्नुयात्सः ॥

Colophon:

इति राजराजेश्वरीवर्णमालिकाष्टोत्तरशतनामस्तवं(वनं) संपूर्णम् ॥

No. 9175. ललितापञ्चविंशतिनामस्तोत्रम्.

LALITĀPAÑCAVIṂŚATINĀMASTŌTRAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 43*b* of the MS. described under **No. 9122.**

Complete.

In praise of the goddes Lalitā, who is the same as Pārvatī, by duly repeating twenty-five significant names denoting her.

Beginning:

अस्य श्रीललितापञ्चविंशतिनामस्तोत्रमहामन्त्रस्य हयग्रीवभगवान्ऋषिः, अनुष्टुप् छन्दः, श्रीमहात्रिपुरसुन्दरी देवता ।

* * * *

सिंहासनेशी ललिता महाराज्ञी पराङ्कुशा ।
चापिनी त्रिपुरा चैव महात्रिपुरसुन्दरी ॥

End:

शृङ्गारनायिका चेति पञ्चविंशतिनामभिः ।
स्तुवन्ति ये सदा भक्तां ललितां भक्तवत्सलाम् ॥

* * * *

पुत्रार्थी लभते पुत्रान् धनार्थी चाप्नुयाद्धनम् ।
विद्याकामो लभेद्विद्यां ललितायाः प्रसादतः ॥

No. **9176.** ललिताष्टोत्तरशतनामस्तोत्रम्.

LALITĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 39*a* of the MS. described under No. 5661.

Complete; as found in the Rudrayāmala.

Similar to the work described under No. 9132.

The goddess Lalitā is the same as Pārvatī.

Beginning:

कल्याणी त्रिपुरा बाला माया त्रिपुरसुन्दरी ।
सुन्दरी सौभाग्यवती क्लीङ्कारी सर्वमङ्गला ॥
ऐङ्कारी सर्वजननी परा पञ्चदशाक्षरी ।
त्रैलोक्यमोहनाधीशा सर्वेशा पुरवल्लभा ॥

End:

चतुर्दशान्तकोणस्था वसुपद्मनिवासिनी ।
चतुरश्रस्वरूपा च बिन्दुस्थलमनोहरा ॥

Colophon:

श्रीरुद्रयामले शिवपार्वतीसंवादे त्रिपुराबाला ।
इति अष्टोत्तरशतदिव्यनामामृतस्तोत्रं सम्पूर्णम् ॥

No. **9177.** ललिताष्टोत्तरशतनामस्तोत्रम्.

LALITĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 4 on a page.

Begins on fol. 64*a* of the MS. described under No. 7247.

Complete.

Similar to the above. These names of the goddess Lalitā are said to have been narrated to Agastya by Hayagrīva.

Beginning:

श्रीशिवा त्रिगुणातीता सच्चिदानन्दविग्रहा ।
स्वयंप्रभा निराधारा निरूपाख्या निरामया ॥
केवला व्यापिनी तुर्या नित्या साक्षिविवर्जिता ।
सर्वशक्तिः सत्यचित्तिः नामरूपविवर्जिता ॥

End:

उमा माया नित्यतृप्ता दुर्गा गौरी च कालिका ॥
एवं श्रीललितायास्तु नाम्नामष्टोत्तरं शतम् ।
हयग्रीवेण कथितमगस्त्याय महात्मने ॥

No. **9178.** ललिताष्टोत्तरशतनामस्तोत्रम्.

LALITĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 8632.

Complete.

Similar to the work described under No. 9132.

Beginning:

सुभगा सुन्दरी सौम्या सुषुम्ना सुषमावती ।
कान्ता कान्तिमती कान्तिरभिरामा मनोरमा ॥

शोभा विरूपा विदुरा रमणीया रतिप्रिया।
महालक्ष्मीर्महाशक्तिः महादेवस्वरूपिणी ॥

End:

योगलक्ष्मीर्भोगलक्ष्मी राज्यलक्ष्मी(:)शुभप्रदा।
सदानन्दा सदाभद्रा ब्रह्मविष्णुशिवात्मिका ॥

No. 9179. ललिताष्टोत्तरशतनामावलिः.
LALITĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 41*a* of the MS. described under No. 5661.

Complete.

This is the Nāmāvali relating to the Nāmastōtra described under No. 9176.

Beginning:

कल्याण्यै नमः। त्रिपुरायै नमः। बालायै नमः। मायायै नमः। श्रीत्रिपुरसुन्दर्यै नमः। सुन्दर्यै नमः। सौभाग्यवत्यै नमः।

End:

चतुर्दशान्तकोणस्थायै नमः। वसुपद्मनिवासिन्यै नमः। चतुरश्रस्वरूपायै नमः। बिन्दुस्थलमनोहरायै नमः ॥

Colophon:

इति श्रीललिताष्टोत्तरशतनामावलिः संपूर्णा ॥

No. 9180. ललिताष्टोत्तरशतनामावलिः.
LALITĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 19*b* of the MS. described under No. 6192, wherein this work has been mentioned as Bālāṣṭōttaraśatanāmāvali in the list of other works.

Complete.

Same work as the above.

No. 9181. ललिताष्टोत्तरशतनामावलिः.
LALITĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 26*a* of the MS. described under No. 6090.

Complete.

Similar to the above.

Beginning:

शिवायै नमः । कल्याण्यै नमः । गौर्यै नमः । शिवप्रियायै नमः । काल्यै नमः । कात्यायन्यै नमः । महादेव्यै नमः । दुर्गायै नमः ॥

End:

मकुटाङ्गदमञ्जीरमेखलाहारभूषितायै नमः । ऊर्मिकाकिङ्किणीरत्नमण्ट-पायै नमः । ताम्बूलकबलो . . . . त्रिमूर्त्यै नमः । श्री-महात्रिपुरसुन्दर्यै नमः ॥

No. 9182. ललिताष्टोत्तरशतनामावलिः.
LALITĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 25*a* of the MS. described under No. 8632.

Complete.

This is the Nāmāvali relating to the Nāmastōtra described under No. 9178.

Beginning:

सुभागायै नमः । सुन्दर्यै नमः । सौम्यायै नमः । सुषुमायै नमः । सुषुमावत्यै नमः । कान्तायै नमः । कान्तिमत्यै नमः । कान्त्यै नमः ।

End:

सदानन्दायै नमः । सदाभद्रायै नमः । ब्रह्मविष्णुशिवात्मिकायै नमः ॥

Colophon:

ललिताष्टोत्तरशतनामावलिः संपूर्णा ॥

No. **9183.** ललितासहस्रनामस्तोत्रम्.
LALITĀSAHASRANĀMASTŌTRAM.

Pages, 35. Lines, 18 on a page.

Begins on fol. 126*b* of the MS. described under No. 2444.

Complete.

Same work as the one described under R. No. 610(*b*) of the Triennial Catalogue, Vol. I, Part I—C, but with Pūrvōttara-pīṭhikā and colophon as given below.

Beginning:

अस्य श्रीललितासहस्रनामस्तोत्रमन्त्रस्य हयग्रीव ऋषिः, अनुष्टुप् छन्दः, श्रीललिता परमेश्वरी देवता, ऐं बीजम्, ह्रीं शक्तिः, श्रीं कीलकम्, मम सकलाभीष्टसिद्ध्यर्थे विनियोगः। ह्रामित्यादिकरषडङ्गन्यासः।

End:

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम्।
आनन्द्रमग्नहृदयः सद्यः पुलकितोऽभवत्।

Colophon:

इति श्रीब्रह्माण्डोत्तरखण्डे हयग्रीवागस्त्यसंवादे ललिताख्याने स्तोत्रखण्डे ललितादेवीरहस्यनाम सम्पूर्णम्॥

No. **9184.** ललितासहस्रनामस्तोत्रम्.
LALITĀSAHASRANĀMASTŌTRAM.

Pages, 27. Lines, 4 on a page.

Begins on fol. 1*a* of the MS. described under No. 2848.

Complete.

Same work as the above, but without the Pūrvōttarapīṭhikā.

No. **9185.** ललितासहस्रनामस्तोत्रम्.
LALITĀSAHASRANĀMASTŌTRAM.

Pages, 31. Lines, 21 on a page.

Begins on fol. 64*a* of the MS. described under No. 2447.

Complete.
Same as the above.

No. **9186.** ललितासहस्रनामस्तोत्रम्.
LALITĀSAHASRANĀMASTŌTRAM.

Pages, 15. Lines, 7 on a page.

Begins on fol. 92*b* of the MS. described under No. 673.
Complete.
Same work as the above.

No **9187.** ललितासहस्रनामस्तोत्रम्.
LALITĀSAHASRANĀMASTŌTRAM.

Pages, 13. Lines, 7 on a page.

Begins on fol. 52*a* of the MS. described under No. 235.
Complete.
Same work as the above, but with the Pūrvapīṭhikā.

No. **9188.** ललितासहस्रनामस्तोत्रम्.
LALITĀSAHASRANĀMASTŌTRAM.

Pages, 54. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 9123.
Fol. 6 is lost.
Almost complete.
Same work as the above.

No. **9189.** ललितासहस्रनामस्तोत्रम्.
LALITĀSAHASRANĀMASTŌTRAM.

Pages, 7. Lines, 10 on a page.

Begins on fol. 201*a* of the MS. described under No. 124.
Complete.
Same as the above, but without the Pūrvōttarapīṭhikā.

No. 9190. ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{3}{4}$ inches. Pages, 10. Lines, 13 on a page. Character, Grantha and Telugu. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

No. 9191. ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Pages, 54. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 9122.

Complete.

Same work as the above; the portion relating to Ṛṣi, Chandas and Dēvatā is given in the middle.

No. 9192. ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 5661.

Same work as the above.

Contains the Pūrvapīṭhikā only.

No. 9193. ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Pages, 48. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 5661.

Complete.

Same work as the above.

No. 9194. ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Pages, 24. Lines, 8 on a page.

Begins on fol. 28*a* of the MS. described under No. 675.

Complete.

Same work as the above.

No. 9115. ललितासहस्रनामस्तोत्रम्.

LALITĀSAHASRANĀMASTŌTRAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 170*a* of the MS. described under Nos. 557 and 7247.

Same work as the above.

Contains only the introductory and Phalaśruti stanzas together with the colophon.

Beginning :

. . . . . मल्लिकाकरवीरकैः ।
उत्पलैर्बिल्वपत्रैर्वा कुन्दैर्वकुलपाटलैः ।
अन्यैः सुगन्धिकुसुमैः केतकीमाधवीमुख्यै (ग्वै) : ।
तस्य पुण्यफलं वक्तुं न शक्नोति महेश्वरः ।
सा वेत्ति ललिता देवी स्वयं चक्रार्चनं फलम् ॥

End :

इत्युक्त्वा श्रीहयग्रीवो ध्यात्वा श्रीललिताम्बिकाम् ।
आनन्दमग्नहृदयः सद्यः पुलकितोऽभवत् ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे उत्तरखण्डे हयग्रीवागस्त्यसंवादे ललितोपाख्याने स्तोत्रखण्डे श्रीललितादेव्या रहस्यसाहस्रं नाम षट्त्रिंशोऽध्यायः ॥

No. 9196. ललितासहस्रनामस्तोत्रभाष्यम्—सौभाग्यभास्करः.
LALITĀSAHASRANĀMASTŌTRABHĀṢYAM: SAUBHĀGYABHĀSKARAḤ.

Substance, paper. Size, $10\frac{5}{8} \times 8\frac{1}{8}$ inches. Pages, 100. Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete in eleven Kalās.

Same work as the one described under R. No. 332 in the Triennial Catalogue of MSS., Vol. I, Part I—A.

No. 9197. ललितासहस्रनामस्तोत्रभाष्यम्.
LALITĀSAHASRANĀMASTŌTRABHĀṢYAM.

Pages, 78. Lines, 29 on a page.

Begins on fol. 1*a* of the MS. described under No. 4932, wherein this work has been mentioned as Lalitābhāṣya in the list of other works given therein.

Complete.

Similar to the above.

Beginnng:

श्रीमाता—श्रियः लक्ष्म्याः माता; यद्वा मातेत्येव नाम, श्रीशब्दस्त्वादरार्थः। ओं श्रीमात्रे नमः। श्रीमहाराज्ञी—श्रीयुक्ता च सा महाराज्ञी च। ओं श्रीमहाराज्ञ्यै नमः।

End:

स्वधा स्वाहा इदं नामद्वयमव्ययम्। शेषाणि स्त्रीलिङ्गानि॥

No. 9198. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Pages, 26. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 5661.

Complete.

Same work as the one described under R. No. 280(*a*) in the Triennial Catalogue of MSS., Vol. I, Part I—A.

This manuscript is said to have been transcribed by Mājēṭi Pāpayaliṅga.

No. 9199. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Pages, 56. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 8819.

Complete.

Same work as the above.

No. 9200. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Pages, 44. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 8848.

Complete.

Same work as the above.

No. 9201. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Pages, 34. Lines, 7 on a page.

Begins on fol. 15*a* of the MS. described under No. 9127.

Complete.

Same work as the above

No. 9202. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Pages, 37. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 8857.

Complete.

Same work as the above.

This manuscript is said to have been copied by Śarukkai Subbarāyaguru.

No. 9203. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Pages, 23. Lines, 25 on a page.

Begins on fol. 1*a* of the MS. described under No. 8782.

Complete.

Same as the above.

No. 9204. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, 13¼ × 1½ inches. Pages, 36. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same as the above.

No. 9205. ललितासहस्रनामावलिः.
LALITĀSAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 38. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 18*a*. The other work herein is Śivasahasranāmāvali 1*a*.

Incomplete.

Similar to the above.

Beginning:

चम्पकाशोकपुंनागसौगन्धिकलसत्कचायै नमः । कुरुविन्दमणिश्रेणिकननको(त्को)टीरमण्डितायै नमः । अष्टमीचन्द्रविभ्राजदलिकस्थलशोभितायै नमः ।

End:

सुखायै नमः । सुवेषाढ्यायै नमः । सुवासिन्यार्चनप्रीतायै (नमः) । शोभनायै (नमः) । शुद्धमानसायै (नमः) । सिन्धुत.

No. 9206. ललितासहस्रनामोत्तरपीठिका—सव्याख्या.

LALITĀSAHASRANĀMŌTTARAPĪṬHIKĀ WITH COMMENTARY.

Pages, 103. Lines, 16 on a page.

Begins on fol. 97*a* of the MS. described under No. 585.

Incomplete.

On the religious efficacy of the repetition of the Lalitāsahasranāmastōtra. There is a commentary to this work.

Beginning:

अथ फलश्रुतिश्लोकानामर्थं संगृह्णाति परिभाषाकारः। अरालती(लेति।) तस्यार्थान्नानाफलसाधनोक्तिः, षट्चत्वारिंशद्भिः श्लोकैस्तस्य क्रमाद्विवृतिः, सार्धषडशीतिश्लोकात्मकस्योत्तरभागस्य मध्ये प्रथमतः सार्धैर्विंशद्भिः(त्या) श्लोकैः प्रतिपाद्यते। सर्वरोगप्रशमनमित्यादिना रोगनिरासादीनि फलानि येन क्रमेण पूर्वं प्रतिपादितानि तेनैव क्रमेणोत्तरत्र तत्तत्फलकाः प्रयोगा वक्ष्यन्त इत्यर्थः।

End:

चरमे जन्मनि यथा श्रीविद्योपासको भवेत्।
नामसाहस्रपाठश्च तथा चरमजन्मनि॥

अस्मिन्नंशे उपमानान्तराभावादेवीनाम्नो देवीमन्त्र एवोपमानमित्याशयेन यथा श्रीविद्योपासक इत्युक्तम्। उपासकशब्द उपास्तिपरः। श्रीविद्येति भिन्नपदम्। गुरुदेवतामन्त्रात्मनामैक्यभावनासिद्धिमदभि.

No. 9207. वाराह्यष्टोत्तरशतनामस्तोत्रम्.

VĀRĀHYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 3. Lines, 24 on a page.

Begins on fol. 121*b* of the MS. described under No. 5643.

Complete.

In praise of the goddess Vārāhī, who is a manifestation of Śakti, by the due repetition of one hundred and eight significant names.

Beginning:

अस्य श्रीवाराह्यष्टोत्तरशतनामस्तोत्रमन्त्रस्य नारायण ऋषिः, अनुष्टुप् छन्दः, श्रीवाराही देवता, विनियोगः।

नमो वाराहवदने वाराहि वररूपिणि ।
क्रोडानने कोलमुखि जगदम्ब नमोऽस्तु ते ॥

End:

सर्वाराध्ये सर्वमयि सर्वलोकात्मिके नमः ।
नमस्ते महिषासीने बृहद्वाराहि ते नमः ॥
एतत्कोलमुखीस्तोत्रं नामाष्टशतमुत्तमम् ।
यः पठेन्नित्यमेकाग्रः स लभेत्सकलान्वरान् ॥

* * * *

आज्ञासिद्धो भवेच्छीघ्रं महावाचस्पतिर्भवेत् ।
भवेन्नारायणः साक्षात् स्वयं मत्या(र्त्यो) न(न)संशयः ॥

Colophon:

इति वाराह्यष्टोत्तरशतं सम्पूर्णम् ॥

No. 9208. वाराह्यष्टोत्तरशतनामस्तोत्रम्.

VĀRĀHYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2 Lines, 10 on a page.

Begins on fol. 167*b* of the MS. described under No. 124.

Complete.

Same as the above.

No 9209. श्यामलाष्टोत्तरशतनामस्तोत्रम्.

ŚYĀMALĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 14 on a page.

Begins on fol. 177*a* of the MS. described under No. 5673.

Complete.

Similar to the work described under No. 9142.

The goddess Śyāmalā is a manifestation of Pārvatī.

Beginning:

श्रीदेव्युवाच —

जगदाह्लादजनक विभो मत्प्राणनायक ।
नाम्नामष्टोत्तरशतं संविद्देव्या वदस्व मे ॥

ईश्वर उवाच—

श्रृणु गुह्यतमं लोके साधु पृष्टं त्वया सखे ।
श्यामलानन्दसंदायि नाम्नामष्टशतं वदे ॥
कुलसुन्दरि मत्प्राणनायिके श्यामले तव ।
सुगोप्यमपि वक्ष्येऽहं न हि गोप्यं तवास्ति मे ॥
अङ्गिराश्च ऋषिः प्रोक्तोऽनुष्टुप् छन्दः प्रकीर्तितः ।
देवता श्यामला देवी सर्वविद्याप्रदायिनी ॥
मातङ्गी विजया श्यामा सचिवेशी शुकप्रिया ।
नीपप्रिया कदम्बेशी मदाघूर्णितलोचना ॥
भक्तानुरक्ता मन्त्रेशी पुष्पिणी मन्त्रिणी शिवा ।
त्रिकोणमध्यनिलया चारुचन्द्रावतंसिनी ॥

End:

ब्रह्मविष्णवीशजननी सर्वसौभाग्यदायिनी ।
गुह्याङ्गी गुह्यगोप्त्री च नित्यक्लिन्नामृतोद्भवा ॥
कैवल्यदात्री वाशिनी सर्वसंपत्प्रदायिनी ।
नाम्नामष्टोत्तरशतं श्यामलायाः प्रकीर्तितम् ॥

* * * *

इह लोके सुखी भूत्वा योगिनीनां भवेत्प्रियः ।
स्तुता तु सततं प्रीता स्तोतुर्लक्ष्मीप्रदा गृहे ॥

Colophon:

इति श्यामलाष्टोत्तरशतनामानि संपूर्णम्(र्णानि) ॥

No. 9210. श्यामलाष्टोत्तरशतनामस्तोत्रम्.

ŚYĀMALĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 10 on a page.

Begins on fol 170*a* of he MS. described under No. 124.

Complete.

Similar to the above.

Beginning:

अस्य श्रीश्यामलाष्टोत्तरशतनामस्तोत्रमन्त्रस्य महाभैरव ऋषिः, अनुष्टुप् छन्दः, श्रीमातङ्गीश्वरी देवता, आदिशक्तिरिति बीजम्, सर्वकामप्रदेति शक्तिः, परंज्योतिस्स्वरूपिणीति कीलकम्, जपे विनियोगः ।

नमस्तेऽस्तु जगद्धात्रि मातङ्गीश्वरि ते नमः ।
श्यामले जगदीशानि नमस्ते परमेश्वरि ॥
नमस्तेऽस्तु महाकृष्णे सर्वभूषणसंयुते ।
महादेवि महादेवि महादेवप्रिये नमः ॥

End:

नमः परापरकले परमात्मप्रिये नमः ।
नमस्ते राजमातङ्गि नमस्तुभ्यं नमोऽस्तु ते ॥
नामाष्टकशतं पुण्यं श्यामलायां इतीरितम् ।

* * * *

लभते महदायुष्य लोकसंमोहनो भवेत् ।
नम(स मृ)त्यन्ते महादेवरूपी नात्र विचारणा ॥

No. 9211. श्यामलासहस्रनामसारस्तोत्रम्.

ŚYĀMALĀSAHASRANĀMASĀRASTOTRAM.

Pages, 25. Lines, 19 on a page.

Begins on fol. 178*b* of the MS. described under No. 5673.

Complete; as found in the 10th Paṭala of Saubhāgyatantra.

Similar to the work described under No. 9140.

Beginning:

श्रीमद्वैकुण्ठनिलयं श्रीपतिं सिद्धसेवितम् ।
सनकादिमहायोगिसेविताङ्घ्रिसरोरुहम् ॥

* * * *

तद्वशीकरणोपायं तव वक्ष्यामि माधव ।
नामसारस्तवं पुण्यं पठन् नित्यं प्रयत्नतः ॥
तेन प्रीता श्यामलाम्बा त्वद्वशीकुरुते जगत् ।
नामसारस्तवस्यास्य न समं विद्यते क्वचित् ॥

* * * *

अस्य श्रीश्यामलानामसारस्तवस्तोत्रमन्त्रस्य सदाशिव ऋषिः, अनुष्टुप् छन्दः, श्रीश्यामलाम्बा देवता ।

* * * *

मातङ्गी विजया श्यामा सचिवेशी शुकप्रिया ।
नीपप्रिया कदम्बेशी मदाघूर्णितलोचना ॥
भक्तानुरक्ता मन्त्रेशी षुष्पिणी मन्त्रिणी शिवा ।
कलावती रक्तवस्त्रा अभिरामा सुमध्यमा ॥
सौभाग्यलक्ष्मीः सौन्दर्यनिधिः समरसप्रिया ।

End:

बहुनोक्तेन किं लक्ष्मि नामसारस्य कीर्तनात् ॥
प्रीयते श्यामला नित्या प्रीताभीष्टं प्रयच्छति ।
इति ते कथितं देवि नामसारस्तवं परम् ॥
अनेन स्तुहि नित्यां त्वं श्यामलाम्बां महेश्वरीम् ।
प्रीता वर्षशतं प्रीतिं श्यामलाम्बा प्रयच्छति ॥

Colophon:

इति सौभाग्यतन्त्रे चतुर्लक्षग्रन्थे श्यामलाम्बानामसारसहस्रनामस्तवो नाम दशमः पटलः ॥

ओं नमो भगवति मातङ्गीश्वरि सर्वमुखरञ्जनि सर्वेषां महामाये मातङ्गीकुमारि हुलु हुलु वश्यं कुरु कुरु स्वाहा । उक्तयोगानां सहस्रजपात् सिद्धिः ॥

Colophon:

इति श्यामलासहस्रनामफलं समाप्तम् ॥

No. 9212. श्यामलासहस्रनामसारस्तोत्रम्.

ŚYĀMALĀSAHASRANĀMASĀRASTŌTRAM.

Pages, 16. Lines, 7 on a page.

Begins on fol. 107*a* of the MS. described under No. 673, wherein this work has been mentioned as Śyāmalāsahasranāmāni in the list of other works given therein.

Complete.

Slightly different from the above and with the addition of a stanza which is given below :—

Beginning :

कनति कनकमञ्चे कामिनीमंसलग्नां
करधृ(त)सुरवीणां लीलया लालयन्ती(न्त)म् ।
अरुणमखिलभूपालङ्कृतं चन्द्रमौलिं
दलितविनमदार्तिं दक्षिणामूर्तिमीडे ॥

(*u*) ŚANI.

No. 9213. शन्यैकविंशतिनामस्तोत्रम्.

ŚANYĒKAVIṀŚATINĀMASTŌTRAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 204*a* of the MS. described under No. 5661.

Complete.

This is in praise and in propitiation of the planet Saturn by the due repetition of twenty-one different names.

Beginning :

सौरिः शनैश्चरः कृष्णो यमः खञ्जो महारिपुः ।
छायासुतश्च रविजो मातर्लिनन्दकासुरः ।

End :

सौरिः शनैश्चरो मन्दः शुभं कुर्यात्सदा मम ।
एभिर्यो नामभिः स्तौति तस्य तुष्टो भवेच्छनिः ॥
गाधिश्च कौशिकश्चैव पिप्पलादो महामुनिः ।
शनैश्चर[ः]कृतां पीडां नाशय[न्त]न्तु (स्तु)तास्त्रयः ॥

Colophon :

शनिस्तोत्रं संपूर्णम् ॥

(*v*) ŚAIVA.

No. 9214. आगमत्रिशतीनामावलिः.
ĀGAMATRIŚATĪNĀMĀVALIḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 78*a* of the MS. described under No. 2854, wherein this work is stated to begin on fol. 66*a* in the list of other works given therein

Complete.

Gives a list of three hundred significant names denoting Śiva as culled out from various Śaivāgamas.

Beginning:

शिवाय नमः । तुर्यचैतन्याय नमः । कूटस्थचैतन्याय नमः । प्रणवार्थाय नमः । सर्वश्रुत्यर्थाय नमः ।

End:

मत्स्याक्षिभृते नमः । कूर्मास्थिसमलंकृताय नमः । क्रोडशृङ्गधराय नमः । नरसिंहचर्माम्बरधराय नमः । त्रिविक्रमास्थिदण्डधराय नमः । हंसमयसर्वाङ्गाय नमः ॥

Colophon:

आगमत्रिशती संपूर्णा ॥

No. 9215. गौरीशङ्कराष्टोत्तरशतनामावलिः.
GAURĪŚAṄKARĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 39*a* of the MS. described under No. 8632.

Complete.

An enumeration of one hundred and eight different significant names of Śaṅkara or Śiva at first followed by the same number of of Gaurī or Pārvatī. They are in the Nāmāvali form used names in the conduct of worship.

Beginning:

महाकैलासशिखरनिलयाय नमः । हिमाचलेन्द्रतनयावल्लभाय नमः । वामभागकलत्रार्धशरीराय नमः । विलसद्दिव्यकर्पूरगौराङ्गाय नमः ।

* * * *

पराशक्तिसमायुक्तपरेशाय नमः । रजताचलशृङ्गाग्रगृहस्थायै नमः । हिमाचलमहावंशपावनायै नमः । शङ्करार्धाङ्गसौन्दर्यशरीरायै नमः । लसन्मरतकस्वच्छविग्रहायै नमः ।

End:

सुधाब्धिस्थमणिद्वीपमध्यगायै नमः । नित्ययौवनमाङ्गल्यमङ्गलायै नमः । महादेवसमायुक्तमहादेव्यै नमः ॥

No. 9216. चिदम्बराष्टोत्तरशतनामावलिः·
CIDAMBARĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Substance, palm-leaf. Size, 13⅝ × 1½ inches. Pages, 8. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 37*a*. The other works herein are Vēdasāraśivasahasranāmastōtra 1*a*, Cidambarakavaca 28*a*, Praṇavāṣṭāviṁśatināmāvali 42*a*, Pañcākṣarāṣṭōttaraśatanāmāvali 42*b*, Rudrasnānādividhi 44*a*.

Complete.

In praise of Śiva and Pārvatī as worshipped in the shrine at Cidambaram : their one hundred and eight names.

Beginning:

चिदम्बरेश्वर्यै नमः । चिदम्बरेश्वराय नमः । हेमसभेश्वर्यै नमः । हेमसभेश्वराय नमः । चित्सभेश्वर्यै नमः । चित्सभेश्वराय नमः ।

End:

शिवायै नमः । शिवाय नमः । त्रिपुरसुन्दर्यै नमः । त्रिपुरसुन्दराय नमः । श्रीचित्सभेशायै नमः । श्रीचित्सभेशाय नमः । श्रीमज्ज्ञानसभेशाय नमः ॥

Colophon:

चिदम्बराष्टोत्तरं संपूर्णम् ॥

No. 9217. जङ्गमाष्टोत्तरशतनामस्तोत्रम्.

JAṄGAMĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 73*a* of the MS. described under No. 1500.

Complete.

In praise of the Jaṅgamaguru of the Vīraśaivas. The repetition of these one thousand and eight names is held to have the power to enable one to become one with Śiva.

Beginning:

श्रीवीरशैवज्ञानावलम्बी नित्यो निरामयः ।
शुद्धप्रसादसंलब्धसारवक्त्रश्च चिन्मयः ॥
भस्मोद्धूलितसर्वाङ्गो नवभक्तिप्रदायकः ।
संसारहेयोन्मूलश्च मलत्रयविदारकः ॥

End:

षड्वर्गसागरोत्तीर्णसेतुः सगुणनिर्गुणः ।
मणिपूरकलिङ्गी च सर्वोद्धारणधर्मवित् ॥
जङ्गमाष्टोत्तरशतं चतुर्वर्गफलप्रदम् ।
यः पठेच्छ्रद्धया धीरः शिवसायुज्यमाप्नुयात् ॥

Colophon:

जङ्गमाष्टोत्तरशतं संपूर्णम् ॥

No. 9218. जङ्गमाष्टोत्तरशतनामावलिः.

JAṄGAMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 79*b* of the MS. described under No. 1500.

Complete.

Same as the above, but in the Nāmāvali form.

Beginning:

श्रीवीरशैवज्ञानावलम्बिने नमः । नित्याय नमः । निरामयाय नमः । शुद्धप्रसादसंलब्धसारवक्त्राय नमः । चिन्मयाय नमः । भस्मोद्धूलित-सर्वाङ्गाय नमः । नवभक्तिप्रदायकाय नमः । संसारहेयोन्मूलाय नमः ।

End:

माणिपूरकलिङ्गिने नमः । सर्वोद्धारणधर्मविदे नमः ॥
जङ्गमाष्टोत्तरशतं चतुर्वर्गफलप्रदम् ।
यः पठेच्छ्रद्धया धीरः शिवसायुज्यमाप्नुयात् ॥

No. 9219. दक्षिणामूर्तिसहस्रनामस्तोत्रम्.

DAKṢIṆĀMŪRTISAHASRANĀMASTŌTRAM.

Pages, 26. Lines, 6 on a page.

Begins on fol. 39*a* of the MS. described under No. 424.

Complete; as found in the Cidambaranaṭanatantra.

In praise of Dakṣiṇāmūrti: his one thousand different names.

Beginning:

पराशक्तयुवाच —

देवेश श्रोतुमिच्छामि रहस्यातिरहस्यकम् ।
सुगुप्तमपि देवेश कथयस्व महेश्वर ॥

ईश्वर उवाच—

रहस्यातिरहस्यं च गोप्याद्गोप्यतरं महत् ।
न कुत्रापि मया प्रोक्तं सर्वस्वमपि पार्वति ॥

* * * *

दक्षिणो दक्षिणामूर्तिर्दयालुर्दीनवल्लभः ।
दीनार्तिहृद्दीननाथो दीनबन्धुर्दयापरः ॥
दारिद्र्यशमनोऽदीनो दीर्घदानवनाशनः ।
दयासरिद्दुःखहन्ता दुष्टभूतनिषूदनः ॥

End:

स्थाणुरूपो महेशानि प्रोक्तं नामसहस्रकम् ।
गोप्याद्गोप्यं महेशानि सारात्सारतरं परम् ॥
* * * *
स्वयोनिरिव गोप्तव्यं न देयं यस्य कस्यचित् ॥
इति संक्षेपतः प्रोक्तः किमन्यच्छ्रोतुमिच्छसि ।

Colophon:

इति श्रीमच्चिदम्बरनटनतन्त्रे परमशक्तीश्वरसंवादे श्रीमेधादक्षिणामूर्तिसहस्रनामामृतस्तोत्रं सम्पूर्णम् ॥

No. 9220. दक्षिणामूर्तिसहस्रनामस्तोत्रम्.

DAKṢIṆĀMŪRTISAHASRANĀMASTŌTRAM.

Substance, palm-leaf. Size, $9\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 5. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 20*a*. The other work herein is Dakṣiṇāmūrtisahasranāmāvali 1*a*.

Incomplete.

Same work as the above; but without the Pūrvapīṭhikā.

No. 9221. दक्षिणामूर्तिसहस्रनामावलिः.

DAKṢIṆĀMŪRTISAHASRANĀMĀVALIḤ.

Pages, 38. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under the previous number.

Incomplete.

This is the Nāmāvali relating to the Nāmastōtra described under the previous number.

Beginning:

दक्षिणाय नमः । दक्षिणामूर्तये नमः । दयालवे नमः । दीनवत्सलाय नमः ।

End:

तन्त्रमार्गरताय नमः । तन्त्रिणे नमः । तान्त्रिकाय नमः ॥

No. 9222. दक्षिणामूर्तिसहस्रनामावलिः.
DAKṢIṆĀMŪRTISAHASRANĀMĀVALIḤ.

Substance, palm-leaf. Size, 13⅝ × 1⅛ inches. Pages, 28. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Similar to the above.

The transcription of this manuscript is said to have been completed by Vēṅkaṭēśan, a disciple of Annadānapaṭṭi Ayyar, on the 5th day of the bright fortnight of the month of Śrāvaṇa in the year Pārthiva.

Beginning:

श्रीदक्षिणामूर्तये नमः । ओङ्काराय नमः । केवलाय नमः । देवाय नमः । महादेवाय नमः । महेश्वराय नमः ।

End:

श्रीकराय नमः । शिपिविष्टाय नमः । श्रीप्रदायकाय नमः ॥

Colophon:

श्रीदक्षिणामूर्तिसहस्रनामावलिः समाप्ता ॥

No. 9223. दक्षिणामूर्त्यष्टोत्तरशतनामस्तोत्रम्.
DAKṢIṆĀMŪRTYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 185*a* of the MS. described under No. 7247.

Complete.

Herein are given one hundred and eight names in praise of Dakṣiṇāmūrti. Their due repetition is held to have the power to enable a person to cure diseases and to dispel evil spirits.

Beginning:

अस्य श्रीदक्षिणामूर्त्यष्टोत्तरशतदिव्यनामामृतस्तोत्रमहामन्त्रस्य गुर्वन्तेवासी ऋषिः, अनुष्टुप् छन्दः, श्रीदक्षिणामूर्तिपरमात्मा देवता, चतुष्षष्टिकलाविद्याप्रकटनार्थे जपे विनियोगः।

ओं आं ह्रां ओं नमः, ईं श्रीं ओं नमः। आं क्लूं ओं नमः।

विद्यारूपी महायोगी शुद्धज्ञानी पिनाकधृत्।
रत्नालङ्कृतसर्वाङ्गी रत्नमाली जटाधरः॥

End:

भेतालादिपिशाचौघराक्षसौघविनाशनः।
राजयक्ष्मादिरोगाणां विनिहन्ता सुरेश्वरः॥

ओं नमो भगवते गुर्वन्तेवासिवत्सलाय सूक्ष्मरूपाय गुरवे सदाशिवाय

* * * *

ब्रह्मराक्षसान् कृष्णवर्त्मनि प्रापय प्रापय क्लीं श्रीं ओं नमः।

एवं श्रीदक्षिणामूर्तेर्नाम्नामष्टोत्तरं शतम्।
आशु जप्त्वैकवारं च वीणायां समरोपितः॥

* * * *

पठतः शृण्वतः कोटिलिङ्गपूजाफलं भवेत्।
रोगहिंसादि हिंसानाम्।

No. 9224. दक्षिणामूर्त्यष्टोत्तरशतनामस्तोत्रम्.

DAKṢIṆĀMŪRTYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 10. Lines, 5 on a page.

Begins on fol. 113*a* of the MS described under No 29.

Complete.

Same work as the above.

No. 9225. पञ्चाक्षराष्टोत्तरशतनामस्तोत्रम्.

PAÑCĀKṢARĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 34*a* of the MS. described under No. 5559.

One hundred and eight significant names in praise of Śiva. The five-syllabled Mantra-formula relating to Śiva occurs at the end of every quarter of each of the stanzas.

Complete.

Beginning:

श्रीकराय दन्तिचर्मचेलिने नमश्शिवाय ।
भाकराय भक्तलोकपालिने नमश्शिवाय ॥
कारणादिकारणात्मकाय ते नमश्शिवाय ।
दारुणासुरेन्द्रगर्वदाय ते नमश्शिवाय ॥

End:

शरभसालुवस्वरूपभरण ते नमश्शिवाय (१०८)
श्रीपञ्चाक्षरमन्त्रमष्टशतसङ्ख्याकस्तवं सर्वदा
ये शृण्वन्ति पठन्ति पावनजनास्तेषां तु रोगौषधम् ।
वेदान्तोद्भवचिद्विशिष्टमनसामप्यूह्यतां दुर्लभं
विन्दन्तीन्दुकलाधरं च सुतरां सायुज्यमुक्तिं मुदा ॥

No. 9226. पञ्चाक्षराष्टोत्तरशतनामस्तोत्रम्.

PAÑCĀKṢARĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Pages, 4. Lines, 6 on a page.

Begins on fol. 127*a* of the MS. described under No 781.

Incomplete.

Same work as the above.

No. 9227. पञ्चाक्षराष्टोत्तरशतनामावलिः.

PAÑCĀKṢARĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 42*b* of the MS. described under No. 9216.

Complete.

A series of one hundred and eight descriptive and significant names in praise of Śiva. Each of the successive letters of the five-syllabled prayer formula relating to Śiva begins a group of these names.

Beginning:

नकाररूपाय नमः । नन्द्याय नमः । नरसिंहनिपातनाय नमः । नरनारायणसखाय नमः । नमिताचलनायकाय नमः ।

End:

यकाररूपाय नमः । यमनिषूदनाय नमः । यज्विने नमः ।

* * * *

यवान्नपूतचेतनाय नमः । याथात्म्यपरमेश्वराय नमः । शिवकामसुन्दरीसमेतश्रीचि(दम्बरेशाय नमः ॥)

No. 9228. प्रणवाष्टाविंशतिनामावलिः.

PRAṆAVĀṢṬĀVIṀŚATINĀMĀVALIḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 12*a* of the MS. described under No. 9215.

Complete.

A series of twenty-eight names relating to Śiva repeated with the Praṇava prefixed to each of them.

Beginning:

ओं ओंकाररूपाय नमः । ओं ओंकारनिलयाय नमः । ओं ओंकारबीजवते नमः । ओं ओंकारसरोहंसाय नमः ।

End:

ओं वह्निरूपाय नमः । ओं वायवे नमः । ओं नभोमहसे नमः ॥

No. 9229. प्रणवाष्टाविंशत्युत्तरशतनामावलिः.

PRAṆAVĀṢṬĀVIṀŚATYUTTARAŚATANĀMĀVALIḤ.

